॥ श्री शंखेश्वरपार्श्वनाथाय नमः ॥

कर्मप्रकृतिसंग्रहणीज्ञातृभिः कर्मप्रकृतिप्राभृतप्रमातृभिरनेकटीप्पनग्रन्थनिर्मातृभिः

आचार्यवर्यश्रीमन्मुनिचन्द्रसूरिभिर्विरचितं

विषमपदाटिप्पनकम्

卐

तेन विभूषिता चिरंतनाचार्यकृता

चूर्णिः

卐

तया शोभितं पूर्वधरवाचकवरश्रीशिवशर्मसूरीश्वरप्रणितं

बन्धशतकम्

तथा

श्री उदयप्रभसूरिविरचितं

टिप्पनकम्

卐

तेन युतं पूर्वधरवाचकवरश्रीशिवशर्मसूरीश्वरप्रणितं

बन्धशतकम्

卐

प्रथम-आवृत्ति पुस्तकाकार-५०० प्रताकार-२५०	मूल्य-पुस्तकाकार १४)रू० ,, प्रताकार १६)रू०	वीर संवत् २४९६ विक्रम संवत् २०२६

प्राप्तिस्थान

Availadle from

१. भारतीय प्राच्यतत्त्व प्रकाशन समिति,
C/o रमणलाल लालचंद
१३५/१३७ झवेरी बाजार, बम्बई २

1 Bharatiya Prachya Tattva Prakashan Samiti
C/o .Shah Ramanlal Lalchandji,
135/37 ZAVERI BAZAAR,
BOMBAY-2.
INDIA

२. भारतीय प्राच्यतत्त्व प्रकाशन समिति.
C/o शा समरथमल रायचंदजी
पिंडवाडा, (राज०)
स्टे० सिरोहीरोड (W. R.)

2 Bharatiya Prachya Tattva Prakashan Samiti
C/o. Shah Samarathmal Raychandji
PINDWARA, (Rajasthan)
St.Sirohi Road (W. R)
INDIA

३. भारतीय प्राच्यतत्त्व प्रकाशन समिति,
. शा. रमणलाल वजेचन्द,
C/o दिलीपकुमार रमणलाल,
मस्कती मार्केट,
अमदावाद २.

3 Bharatiya Prachya Tattva Prakashan Samiti
Shah Ramanlal Vajechand,
C/o Dilipkumar Ramanlal,
Maskati Market,
AHMEDABA-2.
INDIA

मुद्रक-
ज्ञानोदय प्रिन्टिंग प्रेस,
पिंडवाडा (राज०)
स्टे. सिरोहीरोड (W. R.)

卐

Printed by :
GYANODAYA PRINTING PRESS
PINDWARA.
St. Sirohi Road, (W.R.)
Rajasthan,
INDIA

Purvadhara Sri Shivasharma Suri's

BANDHA-SATAKAM

with

Chirantana-acharya's

Churani

and

Gloss,

Clarifying the knotty points thereof,

by

Acharya Sri Munichandra Suri

the author of various other glosses.

卐

Including

A separate imprint of Bandha-Satakam

with

Gloss

by

Sri Udayaprabha Suri

卐

प्रकाशकीय-निवेदन

यह सूचित करते हुए हमें अति हर्ष होता है कि प. पू. परमोपकारी स्व. परम गुरुदेव आचार्य भगवन् श्रीमद् **विजयप्रेमसूरीश्वर** महाराज की कृपा दृष्टि से उन श्री की परम पावनी निश्रा में संकलित और विवेचित लाखो श्लोकों वाले कर्म साहित्य के चल रहे प्रकाशन के मध्य में हमारी समिति इस कर्म-साहित्य विषयक पूर्वाचार्य विरचित अति प्राचीन ग्रन्थ रत्न को आज प्रकाशित कर रही है।

यह **बंधशतक** ग्रन्थ पूर्वधर आचार्यदेव श्री **शिवशर्मसूरि** द्वारा विरचित है जिसके अति प्रौढ विवेचन रूप प्राचीन चूर्णिग्रन्थ भी उपलब्ध है। चूर्णिसहित यह सम्पूर्ण ग्रन्थ आज से पहिले मुद्रित हो चुकने पर भी पूर्वमुद्रित ग्रन्थ के पृष्ठ जीर्णप्रायः होने से इसका पुनःमुद्रण आवश्यक था। तदुपरान्त कुछ समय पूर्व चूर्णि ग्रन्थ के गूढार्थ को प्रकाश में लाती सहस्रावधानी प्रकाण्ड तार्किक आचार्यदेव श्री **मुनिचन्द्रसूरीश्वर** विरचित टिप्पणी की एक हस्तलिखित ताडपत्रीय प्रति पू. आगमप्रभाकर मुनिराज श्री **पुण्यविजय** म० संगृहीत ज्ञानभंडार में से उन के द्वारा उपलब्ध हुई। उसकी एक कामचलाउ प्रति बनवाकर उस प्रति के विशेष शुद्धिकरण हेतु मूल प्रति की एक फोटो कॉपी बनवाकर उसे विराटकाय कर्मसहित्य के कार्यों में अत्यन्त सहायक समझकर उस कार्य में नियुक्त महात्माओं के पास रक्खी गई जिस पर से पू. मुनि श्री **कीर्तिचन्द्रविजय** महाराज ने अपने अमूल्य समय का भोग देकर प्रेस कॉपी तैयार की। उसके तैयार होने पर अभ्यासकर्त्ताओं की अनुकूलता के लिये शतक मूल ग्रन्थ उस पर चूर्णिग्रन्थ और चूर्णिग्रन्थ पर की टिप्पणी क्रमपूर्वक मुद्रित करवाने का निर्णय लिया गया जिसका मुद्रण शुरु हुए आज लगभग एक वर्ष पूरा होने आएगा।

संपादन संशोधन

इस ग्रन्थ का संपादन-संशोधन प.पूज्य **जयघोषविजय** महाराज, प. पू. **धर्मानन्दविजय** म०, प. पू. **जितेन्द्रविजय** म., प. पू. **जगचन्द्र** वि. म., प० पू. **वीरशेखर** वि. म. तथा प. पू. **कीर्तिचन्द्रविजय** म. ने परस्पर मिलकर सुन्दर रीति से किया है।

मुद्रित हो जाने बाद भी अनाभोग प्रेस दोषादि के कारण रही हुई अशुद्धियों के प्रमार्जन हेतु परम-पूज्य स्व. गुरुदेव श्री के विद्वान् शिष्यरत्न आगमप्रज्ञ आचार्यदेव श्रीमद् विजय **जम्बूसूरीश्वरजी** महाराज साहब तथा जैन **श्रेयस्कर** मण्डल पाठशाला, महेसानाके अध्यापक सुश्रावक श्रीयुत् **पुखराजजी** भाई तथा श्रीयुत् **रतिभाई** श्रीयुत् **वसंतभाई** आदि अन्य अध्यापकों ने शुद्धि पत्रक तैयार किया जो ग्रन्थ मुद्रण के अन्त में मुद्रित करवाया है। वाचकों से तदनुसार ग्रन्थ सुधार कर पढने का ध्यान रखने के लिये विनम्र निवेदन है।

संपादन पद्धति–

मूलग्रन्थ चूर्णिग्रन्थ तथा टिप्पणीग्रन्थ और उसमें आते प्रतीक तथा साक्षी ग्रन्थ के अवतरण आदि के लिए विभिन्न विभिन्न छोटे-बडे खुले व गहरे विविध प्रकार के टाईप पसंद कर अभ्यास कर्ताओं की अनुकूलता बनाए रखने योग्य प्रयत्न किया गया है; जैसे मूल ग्रन्थ १६ पोइन्ट ब्लेक टाईप में, चूर्णि ग्रन्थ १६ पोइन्ट सामान्य टाईप में तथा टिप्पणी ग्रन्थ १२ पोइन्ट मोनो ब्लेक टाईप में मुद्रित करवाया है। चूर्णी में आते हुए साक्षी ग्रन्थ के अवतरणों के लिये १२ पोइन्ट सामान्य टाईप, टिप्पणी में चूर्णी की साक्षी के प्रतीक हेतु फेन्सी १२ पोइन्ट टाईप तथा अन्य साक्षी ग्रन्थ के लिये १६ पोइन्ट सामान्य टाईप रक्खे हैं। सुगमता हेतु चूर्णी टिप्पणी में क्रमशः संख्याएँ लिखी हैं।

साथ ही चूर्णी के जो ग्रन्थांशो पर टिप्पणी ग्रन्थ है उन ग्रन्थांशों के प्रारम्भ में संलग्न क्रमांक देने के साथ उन ग्रन्थांश के टिप्पणी ग्रन्थांश को उन २ क्रमांकों द्वारा अंकित किया गया है। इसी प्रकार शक्य उपलब्ध पाठांतरों का भी टिप्पणी द्वारा संग्रह किया गया है, जिससे सर्वतोमुखी अभ्यास हेतु भी संपादन अच्छा हुआ है। मात्र सुगमता हेतु भिन्न २ टाईप काम में लेने से या मुद्रणदोष से कई स्थलों पर कुछ टाईप बराबर मुद्रित न होने से उन स्थलों को सुधार कर पढ़ने के लिये वाचकवृन्द से विनम्र अनुरोध है।

श्री उदयप्रभसूरि टिप्पणी युक्त बन्धशतक

उपरोक्त ग्रन्थ का मुद्रण चल रहा था उस अवधि में एक विचार ऐसा हुआ कि आचार्य श्री **उदयप्रभ**सूरीश्वर की जो शतक मूलग्रन्थ पर एक लघु विवेचन रूप टिप्पणी आज भी अमुद्रित है, यदि वह भी साथ ही एक ही पुस्तक में मुद्रित हो जाए तो सोने में सुगंध। अतः फिर कार्य रूप में परिणत करने हेतु खोज करने पर उस ग्रन्थ की एक ही प्राचीन प्रति है ऐसा हमे पता चला। वह प्रति बंबई की **'रोयल एशियाटिक सोसाइटी'** नामक संस्था के ग्रन्थभंडार में थी। जैन साहित्य विकास मंडल के प्रमुख सेठ श्री **अमृतलाल कालीदास** द्वारा इस प्रति की फोटो कोपी तैयार करवा कर देने हेतु निवेदन किया। निवेदन सेठ श्री ने स्वीकार किया और फोटो कोपी तैयार करवा कर हमें देकर हमारे कार्य के वेग में सहयोग दिया। इस ग्रन्थ की फोटो कोपी की प्रेस कोपी भी विहार में होते हुए भी पूज्य मुनिराज श्री **कीर्तिचन्द्र** विजयजी महाराजने करके अपनी प्राचीनश्रुत के प्रति भक्तिका परिचय दिया प्रेस कोपी होते ही यह टिप्पणी ग्रन्थ भी प्रस्तुत ग्रन्थ के पृष्ठ भाग में क्रमानुसार मुद्रित करवाया गया।

पूर्ववत् इस ग्रन्थमुद्रण में भी टिप्पणी ग्रन्थ टाईप १२ मोनो ब्लेक और मूल गाथा १६ पोइन्ट ब्लेक रक्खे गए हैं। इस ग्रन्थ के संपादक और संशोधक पूर्वोक्त महात्मागण ही है।

कृतज्ञता दर्शन

सबसे पहले हम स्वर्गस्थ गुरुदेव श्रीमद् विजय **प्रेमसूरीश्वरजी** महाराज का जितना आभार माने उतना कम है क्योंकि उनश्री की कृपा और प्रभाव से ही इस समिति का उत्थान और कर्मसाहित्य का विशाल सृजन हो सका है। इन सब के मूल आधार आप श्री ही है।

साथ ही इस ग्रन्थ के संपादन कार्य में साक्षात् सहायता देने वाले पूज्य **मुनिराज श्री जयघोष** विजयजी महाराज, पू. मु. श्री **धर्मानन्द** विजयजी महाराज, पू. मु. श्री **जगच्चन्द्र** विजयजी महाराज, पू. मु.श्री **वीरशेखर** विजयजी महाराज तथा पू. मु. श्री **कीर्तिचन्द्र** विजयजी महाराज का उपकार मानते हैं।

इस ग्रंथ के शुद्धिकरण कर्ता पूज्य आचार्य देव श्रीमद् विजय **जंबूसूरीश्वरजी** महाराज का बड़ा उपकार मानते हैं जिन्होंने इतनी उम्रमें इतने इतने शासन के कार्य होते हुए भी ज्ञान-भक्ति से प्रेरित होकर इस ग्रंथ के मुद्रित फर्मों को ध्यान पूर्वक पढकर शुद्ध किये हैं। इसी प्रकार महेसाणा के प्राध्यापक और अध्यापकों की ज्ञान भक्ति भी वास्तव में प्रशंसनीय हैं।

इस चूर्णिटिप्पणी की फोटो-कोपी प्राप्त करवाने में सहायक पूज्य आगमप्रभाकर मुनिराज श्री **पुण्यविजयजी** महाराज तथा श्री उदयप्रभसूरी कृत टिप्पणी की मूल कोपी पर से फोटो कोपी निकलवाने की स्वीकृति देने वाले मुंबई की संस्था **'रोलय एशियाटिक सोसाइटी'** के कार्यवाहकों तथा सेठ श्री **अमृतलाल भाई** का उपकार भी हम भूल नहीं सकते।

यह ग्रंथ पुस्तकाकार रूप में अच्छे लेजर पेपर में तथा प्रताकाररूप में जुन्नेरी टिकाउ हस्त निर्मित कागज पर छपवाया हैं जिसकी प्रतियाँ अनुक्रम से ५०० व २५० हैं।

ग्रन्थ मुद्रण सहायक

पिण्डवाड़ा श्राविका संघ के उपाश्रय के ज्ञान खाते की ६०००) रु. की जो रकम इस समिति में भेट स्वरुप मिली थी उससे इस ग्रंथ का मुद्रण करवाया गया है। ज्ञान खाते की रकम का सुयोग्य स्थल पर उपयोग करने का जो प्रयत्न श्राविका संघ ने किया है वह भी वास्तव में प्रशंसनीय है।

विजयादशमी वि० सं० २०२६
पिण्डवाड़ा (राजस्थान)
स्टे०-सिरोहीरोड

शा० समरथमल रायचंदजी (मन्त्री)।
शा० शान्तिलाल सोमचंद (भाणाभाई) चोकसी (मन्त्री)
शा० लालचन्द छगनलालजी (मन्त्री)
भारतीय प्राच्यतत्त्व प्रकाशन समिति

– समिति का ट्रस्टी मंडल –

– समिति का निवेदन –

यह सूचित करते हुए अत्यन्त हर्ष होता है कि '**भारतीय प्राच्य तत्त्व प्रकाशन समिति**' द्वारा कर्मसाहित्य का सृजन एवं प्रकाशन गत कुछ वर्षों से सफलतापूर्वक हो रहा है। अत्यन्त अल्प अवधि में इस संस्था ने पाठकों की सेवा में निम्नलिखित विशालकाय ग्रन्थ प्रस्तुत किये है।

कर्मसाहित्य की सेवा एवं भक्ति का अपूर्व लाभ सद्गृहस्थ भी उठा सकते हैं। इस हेतु निवेदन है कि महत्वाकांक्षी सद्गृहस्थ एवं ज्ञानभंडार के ट्रस्टी मंडल इन ग्रन्थों की प्राप्ति के लिए इस संस्था मे रु० ३०१) देकर पूरे सेट का ग्राहक बन सकते हैं। जैसे-जैसे ग्रन्थ छपते जायेंगे, ग्राहकों को भेज दीये जायेंगे।

क्षपक श्रेणी	(मुद्रित)	प्रदेशबंध (मूल प्रकृति)	मुद्रित
स्थितिबंध (मूल प्रकृति)	,,	स्थितिबंध (उत्तरप्रकृति)	बाईन्डींगमें
रसबंध (,,)	,,	प्रकृतिबंध (उत्तरप्रकृति)	प्रेसमें
रसबंध (उत्तरप्रकृति)	,,	प्रदेशबंध (उत्तरप्रकृति)	,,
		मूलप्रकृतिबन्ध	,,

सकलागमरहस्यवेदी सूरिपुरन्दर बहुश्रुतगीतार्थ परमज्योतिर्विद् परमगुरुदेव

परमपूज्य आचार्यदेवेश श्रीमद्विजयदानसूरीश्वरजी महाराजा

विषयानुक्रमः

पृष्ठम् विषयः

१ मंगलादिवक्तव्यता
५ शास्त्रसंबन्धः
७ कृतिवेदनादिचतुर्विंशतिद्वाराणि
११ उपयोगवर्णनम्
१३ योगवर्णनम्
१५ बंधो-दयो-दीरणानां सामान्यस्वरूपम् ।
१६ जीवभेदेषु जीवस्थानानि
१७ पर्याप्तिस्वरूपम्
१८ मार्गणास्थानेषु जीवस्थानानि
२० जीवस्थानेषूपयोगवर्णनम्
२१-२३ प्रथमादिषट्गुणस्थानकस्वरूपम्
२४-२५ सप्तमाष्टमनवमगुणस्थानस्वरूपम्
२६-२७ अपूर्वस्पर्धकद्वादशकिट्टीस्वरूपम्
२८-२९ दशमैकादशद्वादशगुणस्थानकस्वरूपम्
३० त्रयोदशगुणस्थानक-योगनिरोध-चतुर्दश-गुणस्थानकवर्णनम्
३३ मार्गणासु गुणस्थानचिन्तनम्
३४ गुणस्थानकेषूपयोगभेदवर्णनम्
३५ गुणस्थानकेषु योगवक्तव्यता
३६ बन्धप्रत्ययप्ररूपणा तत्र मिथ्यात्व-प्रत्ययस्य वर्णनम्
३७ क्रियावादाऽ-क्रियावादादिमिथ्यामत-वर्णनम्
३८ गुणस्थानकेषु बन्धसामान्यप्रत्ययप्ररूपणा
३९ कर्माष्टकस्य विशेषबन्धप्रत्ययप्ररूपणा
४४ गुणस्थानकेषु बन्धो-दयो-दीरणावर्णनम्
४६ गुणस्थानकेषु बन्धो-दयो-दीरणासंवेधः

प्रकृतिबन्धः

४७ बन्धविधानद्वारे प्रकृतिबन्धस्तत्र मूलोत्तर-प्रकृतिसमुत्कीर्तना
४८ मतिश्रुतज्ञानयोर्भेदप्रभेदप्ररूपणा
५० शेषज्ञानप्ररूपणा

पृष्ठम् विषयः

५१ दर्शनावरणादिशेषकर्मप्रकृतिसमुत्कीर्तना
५९ मूलोत्तरप्रकृतीनां साद्यादिप्ररूपणा
६१ मूलोत्तरप्रकृतीनां स्थानभूयस्कारादिप्ररूपणा
६४ गुणस्थानकेषु बन्धस्वामित्वम्
६७ आदेशतो गत्यादिषु बन्धस्वामित्वातिदेशः

स्थितिबन्धः

६८ मूलप्रकृतीनां जघन्योत्कृष्टतोऽद्धाच्छेदः
६९ उत्तरप्रकृतीनामुत्कृष्टतोऽद्धाच्छेदः
७० उत्तरप्रकृतीनां जघन्यतोऽद्धाच्छेदः
७१ मूलोत्तरप्रकृतीनां साद्यादिप्ररूपणा
७३ स्थितेः शुभाशुभत्वम्
७४ उत्कृष्टस्थितिबन्धस्वामित्वम्
७७ जघन्यस्थितिबन्धस्वामित्वम्

अनुभागबन्धः

७८ मूलप्रकृतीनां साद्यादिप्ररूपणा
८० उत्तरप्रकृतीनां साद्यादिप्ररूपणा
८१ शुभाशुभप्रकृतीनामुत्कृष्टजघन्यानुभागस्य सामान्यतः स्वामित्वम्
८२ शुभाशुभप्ररूपणा
८२ शुभप्रकृतीनां विशेषत उत्कृष्टरसबन्ध-स्वामित्वम्
८४ अशुभप्रकृतीनां ,, ,, ,, ,,
८६ जघन्यानुभागबन्धस्वामित्वम्
९० घाति-संज्ञा
९३ एकादिरसस्थानप्ररूपणा
९४ रसबन्धप्रत्ययप्ररूपणा
९५ रसविपाकप्ररूपणा

प्रदेशबन्धः

९७ वर्गणास्वरूपम्
९९ कर्मयोग्यपुद्गलस्वरूपम्
१०० दलविभाजनप्ररूपणम्

पृष्ठम्	विषयः
१०१	मूलप्रकृतीनां साद्यादिप्ररूपणा।
१०३	उत्तरप्रकृतीनां " "
१०४	मूलप्रकृतीनां ज्येष्ठप्रदेशबन्धस्वामित्वम्
१०५	" जघन्य " " "
१०६	उत्तर " ज्येष्ठ " " "
१०७	उत्कृष्टजघन्यप्रदेशबन्धस्वामिनिर्धारणोपायः
१०८	प्रकृतिस्थितिरसप्रदेशबन्धकारणनिरूपणम्
११०	योगस्थानादिपदानामल्पबहुत्वम्
११२	ग्रन्थोपसंहारः
११३	चूर्णिटिप्पनकृतप्रशस्तिः

श्री उदयप्रभसूरि टिप्पनयुतं बन्धशतकम्

११५ मंगलस्य तथाऽधिकारादीनां वक्तव्यता
११६ मार्गणास्थानेषु जीवस्थानानि।
११७ जीवस्थानेषूपययोगयोगगुणस्थानानि
११८ गुणस्थानकस्वरूपम्
११९ गुणस्थानेषूपयोगयोगप्ररूपणा
१२० सामान्यविशेषबन्धहेतुप्ररूपणा
१२३ बधो-दयो-दीरणास्थानानि तत्संवेधश्च

बंधविधानद्वारान्तर्गतप्रकृतिबन्धः

१२५ प्रकृतिसमुत्कीर्तना
१२६ साद्यादिप्ररूपणा
१२७ बन्धस्थानानि भूयस्कारादिप्ररूपणा च
१२९ बन्धस्वामित्वम्

स्थितिबन्धः

१३१ अद्धाच्छेदप्ररूपणा
१३२ साद्यादिप्ररूपणा
१३३ स्वामित्वप्ररूपणा

अनुभागबन्धः

१३४ अनुभागस्वरूपं साद्यादिप्ररूपणा च
१३६ प्रशस्ताप्रशस्तप्रकृतीनां रसबन्धस्वामित्वम्
१३७ घातिसंज्ञा रसबन्धस्थानप्ररूपणा च
१३९ प्रकृतिप्रत्ययप्ररूपणा
१३९ विपाकप्ररूपणा

प्रदेशबन्धः

१४० कर्मप्रदेशादानविधिः
१४० वर्गणास्वरूपम्
१४१ साद्यादिप्ररूपणा
१४२ स्वामित्वप्ररूपणा
१४३ प्रकृतिस्थित्यादिहेतवः
१४४ योगस्थानादीनामल्पबहुत्वम्
१४५ ग्रन्थोपसंहारः
१४५ टिप्पनकृतप्रशस्तिः

आ ग्रन्थसर्जनना प्रेरक, मार्गदर्शक अने संशोधक

सिद्धान्तमहोदधि, कर्मशास्त्रनिष्णात, सुविशालगच्छाधिपति, सकलसंघकौशल्याधार,

स्व. परमपूज्य आचार्यदेव श्रीमद् विजयप्रेमसूरीश्वरजी महाराजा.

॥ ॐ ह्रीँ अर्हं नमः ॥

॥ णमोत्थुणं समणस्स भगवओ महावीरस्स ॥

॥ श्री-आत्म कमल-दान-प्रेमसूरीश्वरसद्‌गुरुभ्यो नमो नमः ॥

❋ 卐 ❋

कर्म्मप्रकृतिसंग्रहणीज्ञातृभिः कर्म्मप्रकृतिप्राभृतमातृभिरनेकटीप्पनग्रन्थनिर्मातृभिराचार्यवर्यश्रीमद्‌-
मुनिचन्द्रसूरिभिर्विरचितविषमपदटीप्पनकसमलंकृतया चिरंतनाचार्यकृतचूर्ण्या
विभूषितं पूर्वधर वाचकवर-श्रीमत्-शिवशर्मसूरीश्वरप्रणीतम्

बन्धशतकम्

[बंधसयगं]

[तत्रादौ चूर्णिकृन्मङ्गलाचरीन

¹सिद्धो ¹णिहूयकम्मो मद्धम्मपणायगो तिजगणाहो ।
सव्वजगुज्जोयकरो अमोहवयणो जयइ वीरो ॥ १ ॥

॥ शतकचूर्णिविषमपदटिप्पनकम् ॥

卐

प्रणिपत्य विमलकेवल-विलोकिताशेषभावसद्‌भावम् ।
श्रीजिनवरममरार्चित-चरणाम्बुजयुगलममलमहम् ॥१॥
वक्ष्यामि विषमकतिपय-पदसमुदयविवरण समासेन ।
बन्धशतकस्य चूर्णावुपवर्णितवर्ण्यभावायाम् ॥२॥
पदानि वैषम्यवदर्थभाञ्जि, यद्यप्यनेकान्यपि चात्र सन्ति ।
तथापि मे दुर्गतराणि किञ्चित् , व्याख्यातुमेषोऽधिकृतः प्रयत्नः ॥३॥

(१) 'सिद्धो णिहूयकम्मे' त्यादि । सित चिरकालबद्ध कर्म्म ध्मात निर्दग्धं शुक्लध्याना-नलाद्येन स निरुक्तात् सिद्धः । षिधु गत्यामिति गतो निर्वृतिं, ख्यातो सु(भु)वनाद्‌भुतविभूतिभाजनतया । षिधू शास्त्रे माङ्गल्ये च' इति समस्तवस्तुस्तोमशास्ता, विहितमङ्गलः । षिधु संराध्यौ राध-साध संसिद्धाविति साधितसकलप्रयोजनो वा सिद्ध इति । उक्त च--

---

1 'णिद्धूयकम्मो' इति मु. ।

सव्वेवि गणहरिंदा [2]सव्वजगीसेणलद्धसक्कारा ।
सव्वजगमज्झयारे सुयकेवलिणो जयंति सया ॥ २ ॥
जिणवरमुहसंभूया गणहरविरइयसरीरपविभागा ।
भवियजणहिययदइया सुयमयदेवी सया जयइ ॥ ३ ॥

[3]सम्मदंसणणाणचरणतवमएहिं सत्थेहिं अट्ठविहकम्मगंठिं जाइजरामरणरोगअण्णाणदुक्खबीय-भूयं छिंदित्ता अजरममरमरुजमक्खयमव्वाबाहं परमणिव्वुइसुहं कहं नाम [1]भव्वसत्ता पावेज त्ति आयपरहितेसीणं साहूणं पवित्ती । अओ अज्जकालियाणं साहूणं दुस्समाणुभावेणं आयुबलमेहाकरणाइगुणेहिं परिहीयमाणाणं अणुग्गहत्थं आयरिएण कयं सयपरिमाणणिप्फण्णामगं सयगं ति पगरणं,

ध्मातं सितं येन पुराणकर्म्म, यो वा गतो निर्वृतिसौधमूर्ध्नि ।
ख्यातोऽनुशास्ता परिनिष्ठितार्थो, यः सोऽस्तु सिद्धः कृतमङ्गलो मे ॥
[श्रीभगवतीसूत्र वृत्तौ. भा. १ पृ. ३]

निरवशेषतया धुतं कम्पितं कर्म्म ज्ञानावरणादि, काम्यं वा अभिलषणीयं सर्वत्र निस्पृहतया येन स तथा सन् । सुंदरस्त्रिकोटिशुद्धतया धर्मः श्रुतचारित्ररूपः सद्धर्मः । पणायति व्यवहरति. स्तौति प्रणयति प्ररूपयतीति. ण्वुण् प्रत्यये प्रकृष्टो वा नायको यः स तथा । सद्धर्मस्य पणायकः प्रणायकः प्रनायको वा यः स तथा । त्रिजगणेन सम्यग्दर्शन[ज्ञान]चारित्रप्रभवेन तत् समुदयरूपेणाभाति शोभते यः, त्रिजगतो वा भुवनत्रयस्य नाथो यो योगक्षेमकृत् यः स तथा । साध्वेषु सर्वहितेषु सध्येषु वाऽनुकूलेषु कृत्येष्विति गम्यते. जयोऽस्यास्तस्तदुद्योगकरो भव्यानां तदुद्यमकरणशीलो यः । सर्वजगतो वा भुवनत्रयस्य विमलकेवलालोकपूर्व्वकवचनप्रभाप्राग्भाराविर्भावनेन, उद्योतकरः प्रकाशकरो यः स तथा । अमोहं वैचित्यविहीनं,अमोघं वा अनिष्फलं वचनं प्रवचनं यस्य स तथा । जयति दुर्जयरागादिरिपुपराजयफलानुभवात् सर्वोत्कर्षेण वा वर्तते । कोऽसावित्याह । वीरः, सू(शू)रवीरविक्रान्ताविति विक्रान्तोऽन्तरङ्गरागादिविजयाद्, विशेषेण ईरयति क्षिपति कर्म, गमयति. याति वा शिवमिति वीरः, वर्तमानतीर्थाधिपतिरिति ।

(२) 'सव्वजगीसेणलद्धसक्कार' त्ति जगतामीशा जगदीशाश्चमरेन्द्रशक्रादयः, सर्वे च ते जगदीशास्तेषां नमस्करणीयतया इनात् स्वामिनः जिनाल्लब्धसत्कारस्तवनन्तरपदपूजाप्राप्तिलक्षणो यैस्ते सर्व्वजगदीशेनलब्धसत्काराः । सव्वजगदीशेन वा तीर्थपतिना हेतुभूतेन लब्धसत्काराः, भवत्येव तेषां सत्कारलाभे भगवान् हेतुः तेषां तच्छिष्यतया पूज्यत्वादिति ।

(३) इह सर्व्वे प्रेक्षावन्तो न क्वचिदपि प्रयोजनमनुद्दिश्य प्रवर्तंते(न्ते) । अतः प्रेक्षावतः प्रकरणप्रणेतुः शास्त्रकरणलक्षणप्रवृत्तिफलमादर्शयंश्चूर्णिकारः 'सम्मदंसणनाणे' त्यादिना 'तमणुवक्खाइस्सामि' इतिपर्यन्तेन सगोचरां स्वप्रवृत्तिमाह ।

तत्रानुग्रहार्थमित्यत्रायमभिप्रायो यथा--इत ए(ऐ)व तावत्प्रकरणाद्वुःखप्राह-कर्म्मप्रकृतिप्राभृतादिग्रन्थाभ्यासाऽसहा अपि निर्वाणाऽवन्ध्यकारणबन्धादि परिज्ञानादिगुणभाजमनेन निर्वाणशरणा भवन्तु भव्या इति ।

1 सव्वसत्ता' इति खं ।

तमणुवक्खाइस्सामि । [4]तत्थ पुव्वं ताव संबंधो भण्णइ । [5]"संज्ञां निमित्तं कर्त्तारं परिमाणं प्रयोजनम् । प्रागुक्त्वा सर्वतन्त्राणां [1]पश्चाद्व्याख्यानुवर्णयेत् ॥१॥" इति वचनात्, एतस्स पगरणस्स किं णामं ? किं णिमित्तं ? केण वा कयं ? किं परिमाणं ? किं प्रयोजनं ? इति । तत्थ णामं दसप्पगारं ।

[6]"गुण १ णोगुण २ आदाणे ३ पडिवक्ख ४ पहाण ५ णिस्सितं ६ चेव ।
संयोग ७ माण ८ पचय ९ अणादिसिद्धंत १० विद्दियंति ॥ १० ॥"[2]

तत्थ एयं पगरणं पमाणणिप्फण्णणामगं सयगं ति । किं णिमित्तं कयं ? ति णिमित्तं भणियं । केण कयं ? ति [7]शब्दतर्कन्यायप्रकरणकर्म्मप्रकृतिसिद्धान्तविजाणएण [3]दिट्ठिवायत्थजाणएण [4]अणेगवाय-

---

(४) 'तत्थ' इत्यादि । इह संबन्ध उपोद्घातः । संबध्यते शास्त्रनामनिमित्तादिजिज्ञासावतः श्रोतुर्दूरवर्तिसत्शास्त्रं तन्निश्चयसंपादनेन व्याख्यासंनिहितं क्रियतेऽनेनेति व्युत्पातः(त्तेः) ।

(५) 'संज्ञा' मित्यादि श्लोकान्ते "इति वचनादिति" क्वचिन्न दृश्यते । तत्रावावृक्तं चेत्यध्याहारतोऽसौ व्याख्येयः, अन्यथा गमकत्वाभावात् ।

(६) 'गुणणोगुणे' त्यादि, गुणेन अन्वर्थतया युक्त नाम गुणनाम, यथा इन्द्रश्चन्द्र इत्यादि ॥१॥ तद्विपरित नोगुणनाम यथा रथ्यापुरुषस्य कस्यचित् चन्द्रस्वामी सूर्यस्वामी ॥२॥ आत्तद्रव्यनिबन्धनं नाम आदाननाम, यथा वधूरन्तवर्ती आत्तभर्तृधृतापत्यनिबन्धनत्वात् । नैतद् गुणनाम्नोऽन्तर्भवति, तत्रादानादेय विवक्षाभावात् ॥३॥ प्रतिपक्षनाम कुमारी वन्धि(वन्ध्ये)त्यादि, आदाननाम प्रतिपक्षनिबन्धनत्वात् ॥४॥ अथवा आदानमादिः-अध्ययनोद्देशकादेरादिपदं, तदेव नाम आदाननाम यथा 'धम्मोमङ्गलं···असखयमित्यादि ॥३॥ वाच्यार्थप्रतिपक्षवाचकतया नाम प्रतिपक्षनाम यथा मङ्गलोऽङ्गारकः, मधुरं विषम् ॥४॥ प्रधाननाम यथाऽऽम्रवणं निम्बवनमिति वनान्तःसत्स्वप्यन्येष्ववविवक्षितवृक्षेषु विवक्षाकृतप्राधान्याम्रतपिचुमन्दनिबन्धनत्वात् । ५॥ निश्रितनाम यत्पितामहादेर्नाम तत्पक्षपाताद्भिन्यः पौत्रादावन्यत्र निवेश्यते तस्य तन्निश्राया भावात् निश्रितनामत्वम् । एतच्चान्यत्र नामनामेति रूढम् ॥६॥ संयोगनाम द्रव्य-क्षेत्र काल-भावभेदाच्चतुर्धा । तत्र द्रव्यसंयोगनाम दण्डी, छत्रीत्यादि, द्रव्यसंयोगनिबन्धनत्वादस्य । क्षेत्रसंयोगनाम माथुरो बालम इत्यादि, यदि नामत्वेन विवक्षा भवति । कालसंयोगनाम यथा शारदो, वासन्तक इति । भावसयोगनाम क्रोधी मानीत्यादि ॥७॥ मानेन मेयस्य नाम माननाम, शत, सहस्रं, द्रोणः, खारी, पलं, तुला, कर्षादीनि, प्रमाणनाम्नां प्रमेयेषूपलम्भात् ॥८॥ प्रत्ययनाम यत्प्रत्ययेनार्थान्निजाभिधेयस्य हेतुना विशेषितं नाम, यथा जलज सरसिजमिति ॥९॥ अनादिसिद्धान्तनाम अपौरुषेयमावादनादौ सिद्धान्ते प्रसिद्ध यत् तदनादिसिद्धान्तनाम, यथा धर्मास्तिकायो ऽधर्मास्तिकाय इति ॥१०॥

(७) 'शब्दतर्केत्यादि प्रकरणा(ण)शब्दस्य प्रत्येकं सम्बन्धात्[शब्द]प्रकरणं तर्कप्रकरणं ।

---

1 'पश्चाद्व्यता तं वर्णयेत्' इति मु. । 2 अनुयोगद्वारसूत्रे किञ्चित्क्रमभेदेन नाम्न एतेषामेव दशप्रकाराणां तदवान्तरभेदप्रभेदप्रदर्शनपूर्वकं विस्तरेण वर्णनं कृतमस्ति ।

3 'दिट्ठिवायत्थजाणएण' इतिविशेषणं मुद्रितप्रतौ नास्ति किन्तु जे. खं प्रमुखप्रतीषूपलभ्यते ।

4 'अणेगवायसमाअद्धविअएण' इति मु. ।

समरलद्धविजएण मित्रसम्मायरियणामधेज्जेण कयं। किं परिमाणं? गाहापरिमाणेण [1]सयमेत्तं, अक्खरादिपरिमाणेण संखेज्जं, अत्थपरिमाणेण [2]अपरिमियपरिमाणमणेगभेयभिन्नं। किं पयोयणं? ति जीवाणं उवओगजोगपच्चयबंधोदयोदीरणासंजोग-बंधविहाणादिअभिगमणत्थं, तदेव णाणं दंसणं च, तओ बंधाइनिरोहणसमत्थे चरणे उज्जमो, ततो मोक्ख इति एयं पयोयणं। भणिओ संबंधो। एवं 'संबंधागयस्स[3] पगरणस्स इमा आइमा गाहा मंगलाभिधेयाधारसत्थसंबंधत्था–

[अरहंते भगवंते अणुत्तरपरक्कमे पणमिऊणं।
बंधसयगे निबद्धं संगहमिणमो पवक्खामि॥][4]
सुणह इह जीवगुणसंनिएसु ठाणेसु सारजुत्ताओ।
वोच्छं कइवइयाओ गाहाओ दिट्ठिवायाओ॥१॥

व्याख्या– सुणह' त्ति सोतविसयत्तातो सुयणाणस्स, सुयनाणं संबज्झइ। कहं? [5]अहिगयत्थाओ दिट्ठिवायातो गाहाओ सुणह त्ति। तं च सुयणाणं मंगलं। कम्हा? भन्नइ णंदी भावमंगलं ति काउं मंगलपरिग्गहियाणि सत्थाणि णिप्फत्तिं गच्छंति, सिस्सपसिस्सपरंपराए[6] पइट्ठाहिंति चेति अतो सुणहसद्दो मंगलत्थो। 'इह जीवगुणसंनिएसु ठाणेसु सारजुत्ताओ वोच्छं

न्याय-प्रकरणमिति। तत्र शब्दप्रकरणं शब्दशास्त्रं व्याकरणमितियावत्। तर्कप्रकरणं जीवाजीवादिद्रव्याणां सदसन्नित्यानित्यादिपर्यायाणां च निरूपणनिपुणं, द्रव्यानुयोग इत्यर्थः।

न्यायप्रकरणं लौकिकप्रतीतनीतिशास्त्रं नैयायिकसमयानुसारी ग्रन्थो वा। कम्मंप्रकृतिः कर्म्मप्रकृतिप्राकृ(भृ)तम्। सिद्धान्तः शेषसमयः। यदत्र सिद्धान्तग्रहणेन कर्मप्रकृतिग्रहणेऽपि अस्याः पार्थक्योपन्यासस्तदस्य प्रणेतुरत्रात्यन्तकौशलख्यापनार्थम्। ततश्च शब्दतर्कन्यायप्रकरणानि च कर्मप्रकृतिश्च सिद्धान्तश्चेति समासः, तेषां ज्ञायको ज्ञाता, तेन।

(८) 'बंधविहाणादि' त्ति आदिशब्दः स्वभेदसूचकः।

(९) एवं 'संबंधादि(ग)यस्स' त्ति[7]। एवमुक्तलक्षणः सम्बन्ध उपोद्‌घातः, तेन आगतं स वा आदिः प्रथमं यस्य तदेव सम्बन्धागतमेव सम्बन्धादिकं वा तस्य। एवं 'संबंधावियस्से' त्ति क्वचित्पाठः। तत्र एवमुक्तक्रमेण सम्बन्धापितस्य प्रापितसम्बन्धस्येति दृश्यन्ते (ते)।

---

1 'सतं' इति जे.। 2 'अपरिमिय' इति जे. प्रतौ नास्ति। 3 'सबंधातितस्स' इति मु.।

4 "अत्र च-'अरहन्ते भगवन्ते'............॥१॥ गाथा आदौ दृश्यते सा च पूर्वचूर्णिकारैः अव्याख्यातत्वात् प्रक्षेपगाथेति लक्ष्यते।" इत्युक्तं श्री मलधारीयहेमचन्द्राचार्यैर्बन्धशतकवृत्तौ। तथा चोक्तं श्रीमच्चक्रेश्वरसूरिभिर्बन्धशतकभाष्ये-एत्थ य अरहंते इह; आइमगाहा उ अन्नकइरइया। सुणहइह दुइय गाहा इह पत्थुय कविकया णेया॥ [शतक भाष्ये गा. ६] 5 'अधिगतच्छायो' इति मु.। 'अधिकतच्छायो' इति जे.। 6 'परंपरया' इति मु.।

कइवइयाओ गाहाओ' त्ति अभिधेयाधारत्थो । अभिधेया उवओगादयो, 'दिट्ठिवा-याओ' त्ति, सत्थसंबंधत्थो, एस पिंडत्थो । इयाणिं अवयवा विवरिज्जंति–'सुणह' त्ति सीसामंतणवयणं । किं कारणमामन्त्रयतीति चेत् ? उच्यते, सीसायरियसंबद्धपरोवयारोवदरिसणत्थं सोतिंदियोवयोगजणणत्थं च आमन्त्रयति । 'इह' त्ति अस्मिन्प्रकरणे । 'जोवगुणसन्निएसु ठाणेसु' त्ति । सन्नियसद्दो ठाणसद्दो य प्रत्येकं [1]परिसंबध्यते-जीवसन्निएसु ठाणेसु गुणसन्निएसु य ठाणेसु त्ति जीवट्ठाणगुणट्ठाणणामधेज्जेसु त्ति भणियं होति । एतेसिं अत्थो णिद्देसे वक्खाणि-ज्जिहिति । एतेसि विन्यासप्रयोजनं-पूर्वं जीवास्तित्वचिन्तनं तत्सिद्धौ शेषप्रपञ्चसिद्धिरिति जीव-ट्ठाणाइं प्रथमं न्यस्तानि, विद्यमानानां जीवानां गुणचिन्तनमिति तदनन्तरं गुणट्ठाणाणि, एवं विण्णासे पयोयणं । 'सारजुत्ताओ' त्ति सारो अत्थो अत्थजुत्ताओ । काओ ताओ गाहाओ त्ति संब-ज्झइ । 'वोच्छं कइवइयाओ' त्ति वोच्छं भणामि कइवइयाओ 'गाहाओ' [2]त्ति भणियं होइ । गीयन्तेऽर्था [3]अस्यामितिगाथा । ताओ गाहाओ एयंमि पगरणे जीवट्ठाणगुणट्ठाणान्याश्रित्य अत्थमंताओ थोवाओ गाहाओ कहेमि[4] ताओ सुणह त्ति संबज्झइ । स्वेच्छाकहणपरिहरणत्थं सत्थगौरवत्थं च सत्थसंबंधं भणामि-दिट्ठिवायाओ' त्ति आयरियपायमूले विणएण सिक्खि-याओ दिट्ठिवायाओ कहेमि ॥१॥

[10]किं परिकम्म-सुत्त-पढमाणुओग-पुव्वगयचूलिगामइयातो सव्वाओ दिट्ठिवायाओ कहेसि ? नेत्यु-च्यते, पुव्वगयाओ । किं उप्पायपुव्व-अग्गेणियं जाव लोगबिन्दुसाराओ त्ति एयाओ चोद्दसविहाओ सव्वाओ

---

(१०) 'किं परिकम्मे' त्यादि । इह सूत्रादिग्रहणयोग्यतासम्पादनसमर्थानि परिकर्माणि । गणित परिकर्मवता सर्वद्रव्यपर्यायनयापूर्वसूचनार्थं सूत्राणि, ऋजुसूत्रादीनि द्वाविंशतिः[5] । प्रथमानुयोगस्ती-र्थंकरादीनां पूर्वभवाद्यनुयोगः, तद्ग्रहणेन कुलकरादिगंडिकानुयोगोऽपि गृहीतव्य उपलक्षणत्वादस्य, अन्यत्र[6]द्वयोरप्यनयोर्दृष्टिवादैकस्थानत्वेन पठितत्वात् । सर्वश्रुतपूर्वकरणात् पूर्वाणि । पूर्वगतस्यैव उक्ता-र्थसंग्रहात्मिकाश्चूडाः ।

---

1 'परिसमाप्यते' इति मु. । 2 'थोवयाओ' इति जे. । 3 'स्तस्यामिति' मु. । 4 'करेहिमि' इति जे. ।

5 उक्तं च नन्दीसूत्रागमे "से किं तं सुत्ताइं ? सुत्ताइ बावीसं पण्णत्ताइं, तं जहा–उज्जुसुत्तं १, परिणया-परिणयं २, बहुभंगिय ३, विजयचरियं ४, अणंतरं ५, परंपरं ६ मासाणं ७, संजूहं ८, संभिण्णं ९, आयच्चायं १०, सोवत्थिप्पण्णं ११, णंदावत्तं १२, बहुलं १३, पुट्ठापुट्ठं १४, वेयावच्चं, १५, एवंभूयं १६, भूयावत्तं १७, वत्तमाणु-प्पयं १८, समभिरूढं १९, सव्वओभद्द २०, पण्णासं २१, दुप्परिग्गहं २२, इच्चेयाइं बावीसं सुत्ताइं छिण्णच्छेयण-इयाइं ससमयसुत्तपरिवाडिए सुत्ताइं"………इत्यादि । [प्रा. ग्र प. प्रकाशिते पृ. ७४]

6 उक्तं च नन्दीसूत्रे–"अणुओगे दुविहे पण्णत्ते, तं जहा-मूलपढमाणुओगे य गंडियाणुओगे य ।
[प्रा. ग्र. प. प्रकाशिते पृ. ७६]

पुव्वगयाओ कहेसि ? नेत्युच्यते, [1]'अग्गेणियातो बीयाओ पुव्वातो । किं [1]अट्ठवत्थुपरिमाणाओ अग्गेणियपुव्वातो सव्वातो कहेसि ? नेत्युच्यते, पुव्वंते अवरंते [2]धुवे अधुवे एत्थ [3]वयणलद्धीणामपंचमं वत्थु ततो पंचमातो वत्थुतो कहेमि । किं सव्वातो वीसइपाहुडपमाणमेत्तातो कहेसि ? नेत्युच्यते, तस्स पंचमस्स वत्थुस्स चउत्थं पाहुडं कम्मपगडिनामधेज्जं ततो कहेमि । तस्स चउव्वीसं अणुयोगदाराइं भवन्ति । तंजहा–

---

(११) अग्गेणीयाउ' त्ति सर्वद्रव्याणां पर्यवाणां जीवविशेषाणां चाऽग्रस्य परिमाणस(स्य)-वर्णनाद्विभक्तिवशादग्रेणीयम् । इहाग्रेणीयस्य यदष्टवस्तुपरिणामा(माणा)भिधानं सोऽपपाठ इव लक्ष्यते, [4]नन्दीकर्म्मप्रकृतिप्राभृतयोश्चतुर्दशानां वस्तूनां च तत्राभिधानात् । उक्तं च,

(१) पूर्वान्तं ह्यपरान्तं,(२)ध्रुवा(३)ऽध्रुव(४)च्यवनलब्धि(५)नामानि ।
अध्रुवसप्रणिधानं, (६) कल्पं (७) भौमावयाद्यं (८) च ॥ १ ॥
सर्वार्थकल्पनीयं (९)ज्ञान-(१०)मतीतं (११)ह्यनागतं (१२)चैव ।
सिद्ध(१३)मुपाध्यं (१४)च चतु-र्दशवस्तूनि द्वितीयस्य ॥ २ ॥[5]

[ ]

चूर्णौ चोल्लिङ्गना एवं दृश्या, "पूर्व्वंते अवरन्ते धुवे [अधुवे] एत्थ वयणलद्धीनाम पचमं वत्थु' '।

---

1 अत्र 'चोद्दस वत्थुपरीमाणाओ' इति पाठः सङ्गच्छते, 'अट्ठवत्थुपरिमाणाओ' इति पाठो न शुद्धः, किन्तु जे. खं. मु. प्रमुखसर्वप्रतिषु स एवोपलभ्यते, टीप्पनकारश्रीमन्मुनिचन्द्रसूरीश्वरैरपि टीप्पनकेऽस्य पाठस्याऽपपाठरूपेणोल्लेख कृतोऽतो ज्ञायते यत्तेषां समक्षेऽप्ययमशुद्ध पाठ एवासीदिति । वस्तुतोऽष्टवस्तुपरिमाणं न तु द्वितीयस्याऽग्रेणीयपूर्वस्य वर्तते किन्तु तृतीयस्य वीर्यपूर्वस्य 'वीरियस्स णं पुव्वस्स अट्ठवत्थू अट्ठचूलवत्थू पण्णत्ता' इति । नन्दीसूत्रवचनात् । 2 जे. प्रतावत्र 'इत्थ धुवालद्धी अधुवलद्धी अधुवस्स पणिहि नव्वं नाम पंचमं वत्थु' इतिपाठो दृश्यते स तु न सङ्गच्छते । 3 मु. 'खणलद्धीणामपचम' इत्यपि पाठः ।

4 श्रीनन्दीसूत्रपाठश्चैवम्–'अग्गेणीयस्स णं पुव्वस्स चोद्दस वत्थू दुवालस चुल्लवत्थू पण्णत्ता ।' [उक्त. पृ. ७४] तथा च षटखंडागमनाम्ना वर्तमानकाले प्रसिद्धग्रन्थस्य धवलाटीकायाम्–"अग्गेणियं णाम पुव्वं चोद्दसण्हं वत्थूणं·········' इत्यादिपाठः [मु. सस्करण भा. १ पृ. ११५]

5 प्रस्तुतगाथायुगलेन सदृशप्रायं गाथायुगलं दशभक्तिग्रन्थेऽपि वर्तते, तद्यथा–"पूर्वान्तं ह्यपरान्तं, ध्रुवमध्रुवच्यवनलब्धिनामानि । अध्रुवसप्रणिधि चाप्यर्थं भौमावयाद्य च ॥१॥ सर्वार्थकल्पनीयं ज्ञानमतीतं त्वनागतं कालं सिद्धिमुपाध्यं च तथा, चतुर्दशवस्तूनि द्वितीयस्य ॥२॥ [प. ८-९] । तथा च षट्खण्डागमस्य धवलाटीकायाम्-"पुव्वते अवरंते धुवे अद्धुवे चयणलद्धी अद्धुवसंपणिधाणे कप्पे अट्ठे भोम्मावयादीए सव्वट्ठे कप्पणिज्जाणे तीदाणागयकाले सिज्झए बुज्झए त्ति" । इति पाठः (मुद्रित संस्करण भा० १ पृ. २२६) दृश्यते । पुनश्च तस्यामेव धवलाटीकायामन्यत्र [मु. सं. भा. १ पृ. १२३] 'पुव्वते अवरंते धुवे अधुवे चयणलद्धी अद्धुवमं पणिधिकप्पे अट्ठे भोम्मावयादीए सव्वट्ठे कप्पणिज्जाणे तीदे अणागय-काले सिज्झए बुज्झए त्ति चोद्दस वत्थूणि 'इति दर्शितम् ।

[12]"कइ [13]वेदणा य [14]फासे [15]कम्मं [16]पगडि य [17]बंधण [18]णिबंधे ।

---

(१२) *'कइवेयणा य'* इत्यादि रूपकत्रयं । 'कइ' त्ति कृतिः करणं तच्च त्रेधा संघातकरणं, परिशाटकरणं, संघातपरिशाटकरणं चेति । एतत् त्रिविधमपि औदारिक-वैक्रिय-आहारक-तैजस-कार्मणशरीराणां यथायोगं यत्र सप्रपञ्चमुच्यते तत् कृतिरनुयोगद्वारम् ॥१॥

(१३) *'वेयणा'* त्ति कर्मपुद्गलानां, वेद्यन्त इति वेदनासंज्ञितानां निक्षेपादिभिरनुयोगद्वारैः प्ररूपणाधिकारात् वेदनानुयोगद्वारम् ।२।

(१४) *'फास'* त्ति कर्मपुद्गलानामेव ज्ञानावरणादिविभेदतोऽष्टभेदानां परस्परेणौदारिकादि-शरीरैः जोवेन च सह स्पर्शगुणसंबन्धतः प्राप्तस्पर्शाभिधानानां निक्षेपादिभिरनुयोगद्वारैःप्ररूपणा यत्र क्रियते तत् स्पर्श इत्यनुयोगद्वारम् ।३।

(१५) *'कम्मो'* त्ति कर्मपुद्गलानामेव ज्ञानदर्शनावरणादिगुणसद्भावतः प्राप्तकर्मसंज्ञानां कर्म[नि]क्षेपादिभिरनुयोगद्वारैः प्ररूपणा क्रियते यत्र तत् कर्मेत्यनुयोगद्वारम् ।४।

(१६) *'पगडि'* त्ति यत्रानुयोगद्वारे कार्मणवर्गणापुद्गलानां, कृतौ प्ररूपितबन्धलक्षणसंघात-भावानां, वेदनाद्वारे निरूपितवस्तुविशेषप्रत्ययविपाकानां, स्पर्शद्वारे निरूपितजीवसंबन्धगुणानां, कर्मद्वारे च निरूधितस्वस्वव्यापाराणां प्रकृतिनिक्षेपादिभिरनुयोगद्वारैः स्वभावभेदरूपप्रकृतिप्ररूपणा क्रियते । यथा पञ्चस्वभावा ज्ञानावरणस्य, मतिज्ञानावरणादयः । नव दर्शनावरणस्येत्यादि, तत्प्रकृति-रनुयोगद्वारम् ।५।

(१७) *'बंधणं'* ति । बन्धनाभिधायितया बन्धनाभिधानमनुयोगद्वारम् । तत्र चतुर्विधमभि-धेयं, (१) बन्धो (२) बन्धकाः (३) बन्धनीयं (४) बन्धविधानमिति । तत्र बन्धाधिकारे जीवप्रदेशकर्म-पुद्गलानां सादिरनादिश्च बन्धः प्रबन्धतोऽभिधीयते । बन्धकाधिकारे पुनरष्टविधकर्मसंबन्धका अप-र्याप्तसूक्ष्मैकेन्द्रियादयः पर्याप्तसंज्ञिपञ्चेन्द्रियावसानाश्चतुर्दशापि जीवप्रकाराः सप्रपञ्चमुच्यन्ते । बन्ध-नीयद्वारे बन्धयोग्यायोग्यद्रव्यविचारोऽधिक्रियते । बन्धविधानाधिकारे च प्रकृतिस्थित्यनुभागप्रदेशबन्धाः प्रत्येकं सप्रबन्धाः प्रतिपाद्यन्ते ।६।

(१८) *'निबंध'* त्ति । निबन्धनं निबन्धो विषयनियम इत्यर्थः । तत्र यस्मिंश्चक्षुरादीनामिव रूपादिषु प्रकृतीनां निबन्ध उच्यते । यथा सकलरूपिद्रव्यविषयज्ञाननिराकरण एव व्यापारवदवधिज्ञाना-वरणं, गुरुलघुकानं[त]प्रदेशिकरूपिद्रव्यगोचरदर्शनावारकं चक्षुर्दर्शनावरणं । यथा वा शरीराङ्गो-पाङ्गादिपुद्गलविपाकिप्रकृतयो गृहीतौदारिकादिपुद्गलदलिकविशेषसम्पादनविषयव्यापारनियतास्तद-नुयोगद्वारमिति ।७।

(१९) *'पक्कमो'* त्ति । प्रक्रमो बन्धकाल एव क्रमो दलिकप्रमाणपरिपाटिरूपः प्रक्रमः । तत्र यस्मिन्नकर्मस्वरूपेण स्थितानां कार्मणवर्गणास्कन्धानां जीवप्रयोगतो मूलोत्तरप्रकृतिस्वरूपेण परिणमतां प्रकृतिस्थित्यनुभागविशेषेण विशिष्टानां प्रमाणक्रमप्ररूपणा यथाष्टविधबन्धकस्य मूलप्रकृतीनामायुर्भाग-स्तोको नामगोत्रयोस्तुल्यस्ततो विशेषाधिक इत्यादि, तदनुयोगद्वारं प्रक्रमः । एवं विशेषानुयोगद्वाराणा-मप्यभिधेयानुसारतोऽभिधाननिर्देशो दृश्य इति । यच्च 'पक्कइइ' त्ति आदर्शपुस्तकेषु पाठो न स *कर्म-प्रकृतिप्राभृते* दृश्यते । तत्र 'पक्कमु [वक्कमु] दये' त्ति पाठस्यानेकश उपलम्भाद् बुध्यते चासाविति ।८।

[19]वक्कम-[20]मुवक्कमु-[21]दए [22]मोक्खो पुण [23]संकमे [24]लेसा ॥ १ ॥

(२० 'उवक्कमे' त्ति । उपक्रमणं उपक्रमः कर्मणां प्राच्यस्वरूपपरित्यागेन स्वरूपान्तरापादनं, स बन्धनोदीरणोपशमनाविपरिणामभेदाच्चतुर्धा[1] । तत्र बन्धनोपक्रमो बद्धानां कर्मणां प्रकृतिस्थित्यनुभागप्रदेशरूपतया निधत्तिनिकाचनाकरणाभ्यां दृढतरबन्धसम्पादनमिति, यश्चाऽकर्मस्वभावपुद्गलानां जीवव्यापारतः कर्मभावभवनेन बन्धनोपक्रमः स इह नाधिकृतः, कृतिद्वारावतारितत्वात् तस्य । अप्राप्तफलकालानां कर्मणां करणविशेषतः वेद्यमानकर्मभिः सहोदय-क्षयप्रवेशनमुदीरणोपक्रमः । उपशमनैवोपक्रम उपशमनोपक्रमः स च देशसर्वभेदादुपशमनायाः द्विविधस्तत्र देशोपशमना उद्वर्तनाऽपवर्तनासंक्रमव्यतिरिक्तकरणाऽयोग्यतया कर्मणो व्यवस्थापनं, सर्वोपशमना तु सर्वसक्रमादिकरणाविषयतयेति । विरुद्धः कर्मणामकर्मरूपताभवनेन परिणामो विपरिणामो निर्जरेत्यर्थः । स च प्रकृतिस्थित्यनुभागप्रदेशानां देशतः सर्वतश्च भवति, तत्र सर्वतः शैलेश्यादौ स्वस्वसर्वक्षयकालो(ले) शेषकाले च देशतः । स एवोपक्रमो विपरिणामोपक्रमः ।।९।।

(२१) 'उदये' त्ति; उदयो विपाकोऽनुभव इत्यर्थः स च मूलोत्तराणां प्रकृतीनां प्रकृतिस्थित्यनुभागप्रदेशभेदादनेकधा अभि(भि)धानीयः । आह–वेदनोदययोः कः प्रतिविशेषः येनोदयः पृथगुच्यते।त ? उच्यते, स्वपरविपाकानपेक्षं पुद्गलदलिकानुभवनं वेदना, उदयस्तु स्वविपाकापेक्षं कर्मानुभवनमिति।१०।

(२२) 'मोक्खो' त्ति । मोक्षोऽपगमः कर्मणो विनाश इत्यर्थः । सोऽपि प्रकृत्यादिभेदस्य कर्मणो भणनीयः । आह–विपरिणामोपक्रमोऽपि एवंलक्षण एवातः किमस्य पृथगुपन्यासः ? इति । सत्यं, किन्तु विपरिणामोपक्रमो देशसर्वनिर्जराभ्यां कर्ममौक्षलक्षणः । मोक्षः पुनरधःस्थितिगलनाऽन्यप्रकृतिसंक्रमोद्वर्तनादिभिः विवक्षितकर्मस्वरूपाभावलक्षण इत्यनयोर्विशेषः ।।११।।

(२३) 'पुणसंकमे' त्ति । पुनरिति बन्धोत्तरकाले संक्रमणं-संक्रमः पुनःसंक्रमः । यत्प्राग्बद्धकर्मणो बध्यमानस्वजातीयकर्मणि करणविशेषतस्तत्स्वभावताकरणेन निक्षेपणं स च मूलप्रकृतिषु स्थित्यनुभागयोरुत्तरप्रकृतिषु प्रकृतिस्थित्यनुभागप्रदेशानामनेकप्रकार इति ।१२।

(२४ लेस' त्ति । लिप्यते श्लिष्यते आभिर्जीवः कर्मणेति लेश्यास्ताश्च द्रव्यभावभेदाद् द्विभेदास्तत्र द्रव्यलेश्या यानि(नि)किल द्रव्याण्याश्रित्य जीवस्य स्फटिकमणेरिव कृष्णादिलेश्यापरिणामः प्रवर्तते तानि वर्णभेदतो भिद्यमानानि द्रव्यलेश्या इति । तत्र भ्रमराङ्गारकाककोकिलादिसमानवर्णा कृष्णलेश्या शेषास्तु नीली-कापोती-तैजसी-पद्मा-शुक्लाभिधाना लेश्याः यथाक्रमं कदलीदल-कपोतच्छद-जपाकुसुम-कमलकेसर-हंससदृशप्रकाशा विज्ञेया इति । यथोक्तम्—

"किण्हा भमरसवण्णा, नीला पुण गवलगुलि(नीलगुणि)यसंकासा ।
काऊ कवोयवन्ना, तेऊ तवणिज्ज बन्नाभा ॥
पम्हा पउमसवण्णा, सुक्का पुण कासकुसुमसंकासा" । इति

[ ][2]

---

1 उक्तं च श्रीस्थानांगसूत्रे–'चउव्विहे उवक्कमे पण्णत्ते, तं जहा बंधणोवक्कमे, उदीरणोवक्कमे, उवसामणोवक्कमे, विपरिणामणोवक्कमे । [श्री स्था. अध्य. ४ उद्दे. २]

2 षट्खंडागमस्य धवलाटीकायां लेश्यानुयोगप्ररूपणाया[मुद्रित भा. १६ पृ. ४८५]मपीदमेवावतरणं 'वुत्तं च' इत्यादि कथनपूर्वकं टीकाकारेणान्यग्रन्थादुद्धृतं दृश्यते ।

[२५]लेसाकम्मे [२६]लेसापरिणामे तह य [२७]सायमस्साते ।

भावलेश्या पुनर्द्रव्यलेश्याजनितो जीवपरिणामो मिथ्यात्वाऽसंयमकषायानुरक्तयोगप्रवृत्तिरूपः कर्मपुद्गलादानहेतु । एवं च 'योगपरिणामो लेश्या' [1]इत्यपि युक्तमुक्तं, योगपरिणामस्य प्राधान्येन लेश्यात्वात् । मिथ्यात्वादीनां विशेषणत्वेनाऽप्रधानत्वात्तदभावेऽपि क्वचित् केवलस्यैव तस्य लेश्यात्वाभिधानात्, '[2]शुक्ललेश्यः सयोगकेवली' ति वचनप्रामाण्यादिति ।१३।

(२५) लेसाकम्मे' त्ति । लेश्यानां कृष्णादीनां कर्म फलं कार्यमित्यर्थः, लेश्याकर्म तद्यथा-

कृष्णलेश्याऽन्वितो जीवः, निर्दयः कलहप्रियः ।
रौद्रानुबद्धवैरश्च, चौरोऽलीकवचोरतः ॥ १ ॥
मन्दो बुद्धिविहीनश्च, मानी विषयऽालसः ।
निद्रालुरलसो मायी, नीललेश्याऽन्वितो सु(पु)मान् ॥ २ ॥
कापोतीसंगतोऽन्येभ्यः, क्रुध्यत्यात्मप्रशंसकः ।
न प्रत्येति परं जातु, स्तूयमाने च तुष्यति ॥ ३ ॥
दयादानरतो नित्यं, कृत्याकृत्यं च वेत्त्यसौ ।
प्रेक्षति च समं सर्वं, तैजसीमाश्रितः पुमान् ॥ ४ ॥
त्यागी चोक्षः क्षमाशीलः, साधुपूजापरायणः ।
अवक्रकर्मसंयुक्तः, पद्मलेश्यानुभावतः ॥ ५ ॥
अपक्षपाती सर्वत्र, न निदानविधायकः ।
रागद्वेषविहीनश्च, शुक्ललेश्यो भवेदिति ॥ ६ ॥ [ ][3]

(२६) लेश्या(सा)परिणामे' त्ति । लेश्यानां गुणगुणिनोरभेदोपचारात् लेश्यावतां जीवानां परिणामोऽपरापरपर्यायान्तरगमन लेश्यापरिणामः । तत्र कृष्णलेश्यावान् संक्लिश्यमानस्तामेव कृष्णलेश्यां षट्स्थानपतित संक्रामति विशुध्यमानश्च षट्स्थानहान्या तां वा प्राप्नोति अनन्तगुणशुद्धतया नीललेश्यां चेति । एवं नीलादिलेश्यावतामपि संक्लेशतो विशुद्धितश्च परिणामो ज्ञेयः । परं संक्लिश्यमाना नीललेश्यादयः षट्स्थानानुगतस्वस्थानपरिणामाः स्युरनन्तगुणानन्तरलेश्यास्थानपरिणताविति, विशुद्धयन्तश्च षट्स्थानविशुद्धयो वा अनन्तगुणविशुद्धोत्तरलेश्यास्थानविशुद्धयो वा भवेयुरिति । शुक्ललेश्यस्तु विशुद्धयन् स्वस्थानविशुद्धिरेव ।१५।

---

1 'योगपरिणामश्च लेश्या' इत्युक्तं श्रीप्रज्ञापनासूत्रप्रदेशव्याख्यायां श्रीहरिभद्रसूरीश्वरैः ।

2 उक्तं च श्रीमद्देवेन्द्रसूरिभिः स्वोपज्ञवृत्तियुते चतुर्थकर्मग्रन्थे-'छसु सुक्का'.........'षट्सु' अपूर्वकरणानिवृत्तिबादरसूक्ष्मसंपरायोपशान्तमोहक्षीणमोहसयोगिकेवलिलक्षणेसु गुणस्थानकेषु शुक्ललेश्या भवति न शेषाः पञ्च । [चतुर्थकर्म्मग्रन्थे गा. ५०]

3 प्रस्तुतश्लोकषट्कप्रतिपादितार्थसदृशभावार्थप्रदर्शिकाः नवगाथाः षट्खंडागमस्य धवलाटीकायां [मुद्रित भा. १६ पृ. ४९०-४९१-४९२] दृश्यन्ते, जिज्ञासुभिस्तास्ततस्स्वयमवलोकनीयाः ।

२८दीहे ह्रस्से २९भवधारणीय तह ३०पोग्गलाअत्ता ॥२॥
३१णिद्धत्तमणिद्धत्तं ३२णिक्काइयमणिकाइयं य ३३कम्मट्ठिती ।
३४पच्छिमखन्धे [य तहा] ३५अप्पाबहुगं च सव्वत्थ ॥३॥[1] त्ति

(२७) 'सायमसाय' त्ति सदेव स्वार्थिकाण्प्रत्ययात् सातं सद्वेद्यं कर्म । तद्विपरितमसातमसद्वेद्यं कर्म तदेकंकमेकान्तानेकान्तप्रभेदतो द्विरूपं तत्रैकान्ततः सातमसातं वा यद्यद्रूपतया बद्धं तत् तद्रूपतयेव-प्रकृत्यन्तरासंकान्तम् । असंक्रान्तं वा वेद्यमानमेएत (मेत) द्विपरितमने(नै)कान्तत इति ।१६।

(२८) 'दीहे हस्से' त्ति । दीर्घं नाम बहु तद्विपर्ययात् ह्रस्वं तवं (दे)कैकं प्रकृतिस्थित्यनुभाग-प्रदेशभेदाच्चतुर्विधम् तत्र बन्धं प्रतीत्य मूलपकृतिषु सप्तविधबन्धापेक्षयाऽष्टविधबन्धः प्रकृतिदीर्घम् । षड्विधबन्धात् सप्तविध इति । एवमुदयोदीरणासत्तासु । तथोत्तरप्रकृतीनां च धादिषु स्थित्यादिषु च सर्वं चदीर्घं विज्ञाय वक्तव्यम् । ह्रस्वं तु तद्विपर्ययतो योजनीयं तद्यथा-षड्विधः सप्तविधव धाद् ह्रस्वः, सोऽप्यष्टविधब धादित्यादि ।१७।

(२९) 'भवधारणीय' त्ति । भवन्ति कर्मवशिनो जीवा अनेन परिणामेनेति भव । स च त्रिधा ओघ्य घ भवः, आदेशभवो भवग्रहणभवश्च । तत्रौघभा (भ) व कर्माष्टकोदयजनितजनितजीवपरिणामः[2] संसारित्वमित्यर्थः । आदेशभवो गतिनामकर्मोदयोत्पादितो नारकादिशब्दाभिधाननिब धनजीवपरि-णामविशेष । भवग्रहणभव पुन. प्राक्शरीरपरित्यागेन शरीरान्तरारम्भलभवा(व)स्तत्र भवग्रहण-लक्षणे भवे धार्यते जीवो येन तत् भवधारणीयं कर्म तच्चायुरेवेति ।१८।

(३०) 'तह पोग्गला अत्ता' तथेति समुच्चयार्थ. । पुद्गलाः रुपिद्रव्याणि अत्ता गृहीता जीवेनेति शेषः । ते च षोढा, तद्यथा-१, ग्रहणत आत्ता हस्तादिगृहीतदण्डादिव त् । ३, २ परिणामत आत्ता मिथ्यात्वादिपरिणामगृहीतपुद्गलादिवत् । ३, उपभोगत आत्ता य उपभोगार्थं गृहीता पुद्गला गन्धतम्बोलादिवत् । ४, आहारत आत्ता ये आहारार्थं गृहीता., अशनपानादिवत् । ५, ममत्वत आत्ता येऽनुरागतो गृहीताः, वनितादिवत् । ६, परिग्रहत आत्ता]³ परिग्रहतः स्वायत्तीकृतवनादिवत् ।१६।

(३१) 'णिद्धत्तमणिद्धत्तं' त्ति । निधन(त्तं) नाम उद्वर्तन(ना)पवर्तनातिरिक्तकरणायोग्य तया कर्म म)णः करणं, तद्विपरितमनिधत्तं ।२०।

(३२) 'णिकाइयमणिकाइयं' ति । निकाचितं नाम बन्धोत्तरकाल कषायोदयविशेषात् संक्रमादिकरणकलापागोचरतया कर्मणो विधानम् । एतद्विपरितमनिकाचितमिति ।२१।

(३३) 'कम्मट्ठिइ' त्ति । कर्मणां ज्ञानावरणादीनां बन्धक्षणप्रभृति प्रानिर्जराक्षणं जीवप्रदेशैः सम्बन्धपरिणामः स्थितिः । सा च मूलोत्तरप्रकृतिभेदतो जघन्यादिभेदतश्चानेकविधेति ।२२।

(३४) 'पच्छिमखंधे त्ति । इह त्रिधा प्रागुक्तभवमाव ओघभवादिर्भवस्तत्र भवग्रहणभवेनात्रा-धिकारः, ततश्च पश्चिमेऽधिकारात् भवग्रहणे स्कन्धः प्रक्रमात् कर्मपुद्गलसमुदायः पश्चिमस्कन्धः । तत्र बन्धोदयोदीरणासंक्रमसत्ताः प्रतीत्य कर्मणा ज्ञानावरणादीनां प्रकृतिस्थित्यनुभागप्रदेशानां मार्गणं मिथ्यादृष्ट्यादिगुणस्थानेषु विधीयत इति ।२३।

(३५) 'अप्पाबहुयं च सव्वत्थे' त्ति । अल्पबहुत्वं च सर्वत्र कृतिवेदनादिद्वारेषु यथायोगमुन्ने-

1 णिद्धत्तमणिद्धत्तं च णिक्काइयमणिक्काइयं कम्मट्ठिति । पच्छिमखधे अप्पाबहुग च सव्वत्थग्गो ॥३॥ इति पाठो मुद्रितप्रतौ । 2 अत्र 'कर्माष्टकोदयजनितो जीवपरिणामः' इतिपाठ उचितः ।

3 [........] कोष्ठकान्तर्गतः पाठः आदर्शे नास्ति किन्तु पूर्वापरार्थानुसंधानमालोच्यास्माभिर्ग्रन्थान्तर [मुद्रित-धवला भा. १५ पृ- ५१४,५१५] गत प्रस्तुतविषयमवलोक्य तदनुसारेणात्र परिपूरितः ।

किं सव्वतो चउवीसाणुओगदारमइयातो कहेसि ? नेत्युच्यते, तस्स छट्ठमणुओगदारं बंधणं ति ततो कहेमि। तस्स चत्तारि भेदा। तंजहा–बंधो, बंधगो, बंधणीयं, बंधविहाणं ति। किं सव्वातो चउव्विहाणुओगदारातो कहेसि ? नेत्युच्यते, बंधविहाणं ति चउत्थमणुओगदारं, ततो कहेमि। तस्स चत्तारि विभागा। तंजहा-पगइबंधो, ठिइबंधो, अणुभागबंधो, पदेसबंधो त्ति मूलुत्तरपगइभेयभिन्नो, ततो चउव्विहातोवि किंचि २ समुद्धरिय २ भणामि। सत्थसंबंधो भणितो।

पुव्वि जीवट्ठाणगुणट्ठाणेसु सारजुत्ताओ गाहाओ भणामि त्ति भणियं, ताओ केरिसत्था[1]-हिगाराओ त्ति तासिं अन्थाहिकारणिरूवणत्थं दो दारगाहाओ–

[2]उवयोगाजोगविही जेसु य ठाणेसु जत्तिया अत्थि।
अप्पबहुओ बंधो होइ जहा जेसु ठाणेसु ॥२॥
बंधं उदयमुदीरणविहिं च तिण्हंपि तेसि संजोगं।
बंधविहाणे य तहा किंचि समासं पवक्खामि ॥३॥

व्याख्या– [3]'उवयोगाजोगविही जेसु य ठाणेसु जत्तिया अत्थि' त्ति, [4]'आसन्नो योगो उपयोगो, उवजुज्जति त्ति वा उवओगो, अविरहियजोगो वा उवयोगो। संसारत्थाणं णिव्वुयाणं च जीवाण सव्वकालं तेण जोगो त्ति काउं उवओगो वुच्चति। किं कारणं ? जीवस्वभावत्वात् तव्विरहिओ जीवो ण भवइ त्ति। सो दुविहो–सागारोवओगो अणागारोवओगो य। सागारोवओगो सरूवावहारणं रूवाइविसेसविन्नाणमित्यर्थः। तेसिं चेव सामन्नात्थावबोहो खंधावारोपयोगवत् सो अणागारोवओगो। पंचविहं णाणं अन्नाणतिगं च सागारोवयोगो। चक्खुआइचउव्विहं दंसणं अणागारोवओगो। तत्थ पंचविहं णाणं आभिणिबोहियाइ। तत्थ पंचण्हमिंदियाणं मणो छट्ठाणं उग्गहादयो चत्तारि भेया, [5][......] तेहिं य [36]'सुयाणुसारेण घडपडसंखाइविन्नाणं संपयकालीयं तं आभिणिबोहियं। इंदिय मणोणिमित्तं अतीतादिसु अत्थेसु सुयाणुसारेण जं णाणं उपज्जइ तं सुयणाणं, आभिणि-

---

तव्यमिति।२४।

एषां च कृत्याद्यनुयोगद्वाराणां चतुर्विंशतेरपि विस्तरार्थः 'कर्मप्रकृतिप्राभृतादधिगमनीयः। अत्र चूर्णिकारकृतद्वारोल्लिङ्गनाश्रुतकृत्यादिपदाभिधि(धे)यनिर्देशमात्रस्य प्रस्तुतत्वादिति॥

(३६) 'तेहिं य सुयाणुसारेण' त्ति। अभिधानप्लावितार्थग्रहणप्रत्ययो लब्धिविशेषः श्रुतम्। उक्तं च,

---

1 मु प्रतौ 'केरिसि ? सत्थाहिगाराओ' इति पाठः। 2 'उवयोगजोगविही' इति मु.। 3 'उवओगविही' इति मु.। 4 मु प्रतौ 'आसन्नो .....' इति व्युत्पत्तेः पूर्वं 'उपयुज्यत इति उपयोगः' इत्येवं व्युत्पत्तिः, सा च जे. प्रतौ न दृश्यते। 5 खे. प्रतावत्र [........] कोष्ठकस्थाने 'चक्खुमणोवज्जाणं तु वंजणावग्गहो चउहा' इतिपाठोऽधिकः।

बोहियंपि तत्थत्थि जेग तं पालिज्जइ। इंदियमणोणिरवेक्खं अणावरियजीवपएसखयोवसमणिमित्तं साक्षात् ज्ञेयग्राहि तदवधिज्ञानं, प्रदीपज्वालावटकान्तरविनिर्गतप्रकाशघटादिप्रकाशवत्। मणत्तेणं गहेऊणं पोग्गले जाणइ जीवो जेहिं ते मणो भणंति. तेसिं पोग्गलाणं पज्जाया मणोपज्जाया तेसु णाणं मणपज्जवनाणं। [37]तहेव सुद्धा जीवपदेसा परिछिंदन्ति त्ति ते पोग्गले णिमित्तं काउणऽतीताणागयवट्टमाणे भावे पलिओवमासंखेज्जइभागे पच्छाकडे पुरेकडे खओवसमाओ माणुसखेत्ते वट्टमाणे जाणइ ण परतो तं मणपज्जवणाणं। केवलं सकलं संपूर्णं जीवस्स णिस्सेसावरणखयसंभूयं, [38]अहवा सव्वदव्वपज्जायसकलावबोहणेण वा केवलं अच्चंतखाइयं केवलणाणं। मूलिल्लेसु तिसु णाणेसु अन्नाणभावो वि होज्जा, मिच्छत्तोदया,पित्तोदयव्याकुलीकृतचित्तस्य शुक्लरूपविपर्ययात् पीतावभासिरूपवत्। [39]मतिश्रुतावधयश्च विपर्यासं गच्छन्ति। [40]कथं? कटुकालाबुगद्रव्ये [1]प्रक्षिप्तक्षीरसर्क-

---

जे अक्खराणुसारेण मइविसेसा तयं सुयं सव्वं।
जे पुण सुयणिरवेक्खा सुद्धं चिय तं मइन्नाणं ॥१॥

[श्रीविशेषावश्यकभाष्ये गा. १४४]

तच्च शब्दात् गम्यार्थाविनाभूतार्थान्तराद्वा स्यात्। यदुक्तम्-

'दुविहं सुयनाणं सद्दलिंगय असद्दलिंगयं च' त्ति। तस्यानुसारोऽनुगमो निश्रेत्यर्थः। अयं चास्य श्रुतस्य प्राक्श्रुतसंस्कृतमतेः संप्रति अभ्यासातिशयात् श्रुतव्यापारनिरपेक्षधियोऽनुगमविहीनस्यैव प्रमातुर्ज्ञानप्रवृत्तावेति। यदुक्तम्-

पुव्वं सुयपरिकम्मियमइस्स जं संपयं सुयाईयं।
तं निस्सियमिियरं (मियरं) पुण अणिस्सियं मइचउक्कं तं ॥

[श्रीविशेषावश्यकभाष्ये, गा. १६९]

मतिचतुष्कमौत्पत्तिक्यादि। इदं च म[ति]ज्ञानं श्रुतनिश्रितं बाहुल्यमपेक्ष्योच्यते, अन्यथा तन्निश्रामन्तरेणापि एकेन्द्रियादिषु तस्य संभवात्।

(३७) 'तहेवे' त्यादि। तथैव अवधिज्ञान इव शुद्धाः संजाततदावरणक्षयोपशमाः। द्रव्यव(त)स्तान् मनस्त्वपरिणतान् निमित्तीकृत्य गोचरतया लये(ऽवलम्ब्ये)त्यर्थः। भावतस्ती(तोऽती)तानागतवर्तमानान् भावान् बाह्यावस्थालोचनान् गुणान् तत्पर्यायान्, कालतन्ती(तोऽती)तानागतयोः पल्योपमासंख्येयभागयोर्यथाक्रमं पश्चात्कृतपुरस्कृतान् क्षयोपशमनियमात्, क्षेत्रतो मनुष्यक्षेत्रगतान् जानातीति।

(३८) 'अहवे' त्यादि। अथवेति भेदान्तरोपक्षेपार्थः। सर्वेषां द्रव्याणां तत्पर्यायाणां च सकलक्षेत्रकालाद्यनुवेधानुसरणात् सपूर्णमवबोधनं परिच्छेदनं सर्वद्रव्यपर्यायसकलावबोधनं तेन वा केवलं, एतेन विषयसाकल्यतो विषयिणो ज्ञानस्यापि साकल्यमभिहितमिति।

(३९) 'मतिश्रुते' त्यादि। अत्र चकारो मङ्गचन्तरभणनार्थम्। एषां हि अज्ञानभावो विपर्यासाभिहितो। विपर्यासश्च मिथ्यात्वानुरक्तत्वेन आत्मनः।

1-द्रव्योपक्षिप्त-इति मु.।

रादिद्रव्यविपर्यासवत् । [४१]भाजनविशुद्धितश्च दव्वाणमविणासो दिट्ठो जहा सुपरिसुद्धालाबुद-[1]व्वोवक्खित्तखीरादिदव्वाविवत्तिवत् तथा च तत्त्वार्थश्रद्धानम् । अहवा विससम्मीसओसहसंपर्कवत् मइघातोववूहणं च । एते अट्ठ सागारोवओगा । अणागारोवओगो चउव्विहो चक्खुदंसणाइ । चक्खिंदियसामन्नत्थावबोहो चक्खुदंसणं । सेसिंदियमणोसामन्नत्थावबोहो अचक्खुदंसणं । ओहिणाणेणं [2]सामन्नत्थावगाहगं ओहिदंसणं । केवलनाणेण सामन्नग्गहणं केवलदंसणं । एवमेते बारस उवयोगा परूविया । 'जोगो' त्ति,

"जोगो विरियं थामो उच्छाहपरक्कमो तहा चेट्ठा । सत्ती सामत्थं चिय जोगस्स हवंति पज्जाया ॥१॥"

[3]वीरियंतराइखयोवसमजणिएण पज्जाएण जुज्जइ जीवो अणेणेति योगो, अहवा जुंजइ जीवो वीरियंतराइखयोवसमजणियपज्जायमिति जोगो ।

"मणसा वाया काएण वावि जुत्तस्स विरियपरिणामो । जीवस्स अप्पणिज्जो स जोगसन्नो जिणक्खाओ ॥१॥
तेजोजोगेण जहा रत्तत्ताइ घडस्स परिणामो । जीवकरणप्पओगे विरियमवि तहप्पपरिणामो ॥२॥

सो मणजोगाई तिविहो दुब्बलस्स यष्टिकादिद्रव्यवत् उवट्ठंभकरो, अहवा जोगो वावारो सो मणआइणं । मणजोगो चउव्विहो-सच्चमणजोगो जाव असच्चामोसमणजोगो । मणजोगस्स सच्चतं मोसत्तं सच्चमोसत्तं असच्चामोसत्तं वा णत्थि, किं तु [४२]णोइंदियावरणखयोवसमेण मणणाणपरिणयस्स जीवस्स [4]बलाधारभूयस्स जोगस्स सहचरियत्तातो सच्चादिववदेसो, जहा बालस्स बलाधाणकारणं अन्नं पाणा इति । अहवा जोगस्सेव पाहन्नविवक्खया सच्चासच्चाइपरिणामो, [४३]जहा बाहिरकारणनिरवेक्खो नाणपरिणामो तच्चातच्चववएसो भवति [5]तहा जोगस्स वि तच्चातच्चपरिणामो भवति । एवं वायाकरणेण जोगो वइजोगो । वइजोगोवि चउव्विहो तहा चेव । सच्चमोसत्तं

(४०) कथमित्याह-'*कटुकालाबुके*' त्यादि दृष्टान्तः । आह किं यथा आश्रयःऽशुद्धेराश्रयिणो ऽप्यशुद्धिस्तथा तद्विशुद्धावविनाश इत्याह ।

(४१) '*भाजने*' त्यादि । तथेति दार्ष्टान्तिकोपनयनार्थम् । यथा किल विशुद्धाधारवशात् दुग्धादिद्रव्याविपर्यासस्तथा मिथ्यात्वोदयवैकल्यतो मत्याद्यविपर्यासलक्षणं तत्त्वार्थश्रद्धानमाविरस्तीत्यर्थः ।

(४२) किन्तु '*नोइन्द्रिये*' त्यादि । अत्रायमभिप्रायः सत्यत्वादयो ज्ञानधर्मास्ते च मनोज्ञानप्रवृत्तिनिमित्तभूतमनोद्रव्यसमुत्थजीवप्रयत्नात्मकमनोयोगकार्यगुणोपचाराद्(द)दृष्टा इति । दृष्टान्तार्थः-यथा बालस्य बलाधानकारणमन्नं प्राणहेतुरपि प्राणा इति ।

(४३) '*यथे*' त्यादि । यथा च बाह्यकारणनिरपेक्ष उपचारहेतुनिरपेक्षः स्वत एव ज्ञेयानुगुणादितया ज्ञानपरिणामः सत्यादिव्यपदेशभाक् तथा तदुपष्टम्भकः प्रयत्नात्मयोगोऽपि साद्गुण्यादित एव तथा व्यपदिश्यते ।

1 दव्वोपक्षिप्त इति मु. । 2 'सामन्नत्थावगाहगं' इति मु. । 'सामन्नपत्थसाहगं' इति खं. । 3 'वीरियंतराइयखयखयोवसमजणिएण' इति जे. । 4 'बलाहाणभूयस्स' इति जे. । 5 'तहा जोगस्स वि तच्चातच्चपरिणामो भवति' इति पाठः मु. प्रतौ नास्ति ।

कहमिति चेत् ? भन्नति, तंजहा–असोगवणं चंपयवणमिति । अन्नेसुवि रुक्खेसु विज्जमाणेसु असोग-वणं चंपयवणमेवेति णाणं ववहारो वा तस्स वलाधाणकारणभूतो जोगोवि तव्ववदेसभागी भवति । कायजोगो सत्तविहो, तंजहा–ओरालियकायजोगो, ओरालियमिस्सकायजोगो, वेउव्विय, वेउव्विय-मिस्सओ, आहारगो, आहारगमिस्सओ, कम्मइगकायजोग इति । तत्थ ओरालियमिति ओरालं उरलं महत् बृहच्चेति एगट्ठं । उरालमेव ओरालियं; ओराले भवं वा ओरालियं । कहमुदारत्तं ? भण्णइ–[४४]पदेसतो असंखेज्जगुणहीणत्तातो ओगाहणातो असंखेज्जगुणब्भहियमिति । ओरालियकाएण जोगो ओरालियकायजोगो । ओरालियमिस्सकायजोगो त्ति मिस्समिति अप्पडिपुन्नं, जहा गुड-मिस्सं अन्नदव्वं गुडमिति ण ववदिस्सति, अन्नमिति च न ववइस्सइ, गुडेतरदव्वेण अप्पडिपुन्न-त्ताओ; एवमिहावि ओरालियकम्मइगसरीरद्रव्यमिश्रत्वात् मिश्रव्यपदेशः । अथवा सरीरकज्जपयोय-णाकरणाओ मिस्सं, अपरिनिष्ठितघटवत् । जहा अपरिनिट्ठितो घडो जलधारणादिसु असमत्थो घडोवि घडववदेसं न लभते, एवमिहावि अपडिपुन्नत्तातो अपरिणिट्ठितो त्ति मिस्समिति वव-दिस्सते, एवं सव्वत्थ मिस्सविही । विविहइड्ढिगुणजुत्तमिति वेउव्वियं, अहवा विविहा क्रिया विक्रिया, विक्रिया एव वैक्रियं विक्रियायां वा भवं वैक्रियं, वेउव्वियकाएण जोगो वेउव्वियकाय-जोगो । मिश्रं पूर्ववत् । णिपुणाणं वा णिद्धाणं वा सुहमाणं वा आहारगदव्वाणं सुहुमतरमिति आहारकं, आहारेइ अणेण सुहुमे अत्थे इति वा आहारगं, आहारगकाएण जोगो आहारगकायजोगो । मिश्रं पूर्ववत् । कम्ममेवेति कम्मइगं, कम्मणि भवं वा कम्मइगं । कम्मकम्मइगाणमणाणत्तमितिचेत् ? तन्न, कम्मइगस्स [1]कम्मइगसरीरणामोदयनिप्फन्नत्वात्, किंतु कम्मइगसरीरपोग्गलाणं कम्म-पोग्गलाणं च सरिसवग्गणत्तातो तंमि चेव तस्स ववदेसो । सव्वकम्मप्परोहणुप्पायगं सुहदुक्खाण बीयभूयं कम्मइगसरीरं, तेण जोगो कम्मइगकायजोगो । एवमेते पन्नरसजोगा परूविया ।

'उवओगाजोगविही' त्ति । विधिसद्दो पत्तेयं पत्तेयं संबज्झइ उवओगविही जोगविही, विही विहाणं भेदो विगप्पो । 'जेसु य ठाणेसु' त्ति जीवट्ठाणगुणट्ठाणेसु 'जत्तिया अत्थि' त्ति जावतिया अत्थि अमुगंमि जीवट्ठाणगुणट्ठाणंमि य जत्तिया उवओगा जोगाय संभवंति त्ति

(४४) 'पएसतो' इत्यादि । इह कश्चिदाह–औदारिकशरीरमुत्कर्षतोऽपि योजनसहस्रप्रमाणं वैक्रियं च योजनलक्षप्रमाणमिति वैक्रियमौदारिकात् संख्येयगुणावगाहं । कथमुच्यते 'ओगाहणाउ असंखेज्जगुणब्भहियं' औदारिकं वैक्रियादिति ? उच्यते–प्रदेशापेक्षमेतद्, तथाहि–वैक्रियशरीरप्रदेशा-वौदारिकशरीरप्रदेशः सर्वोऽपि अवगाहतो असंख्येयगुणः । इत्यत्यन्तमल्ये(मल्पा)पि ते योजनसहस्रादि-प्रमाणपूरकाः, अन्यथा यदि ते वैक्रियशरीरप्रदेशावगाहा भवेयुस्ततस्तद्वैक्रियादसंख्येयगुणहीनमेव भवेदिति ।

1 'कम्मशरीर-इति जे. ।

एयंमि पगरणे एयं भणति । 'जपच्चइओ बंधो' त्ति, पच्चयो हेउ कारणं णिमित्तं ति एगट्ठं, पच्चयो चउव्विहो मिच्छत्तं असंजमो कसाया जोगा इति । असुगंमि गुणट्ठाणे असुगपच्चइगं कम्मं बज्झइ त्ति एयंपि एत्थ भन्नइ । 'होइ जहा' इति णाणावरणादीणं कम्माणं बंधो जहा होइ त्ति [1]विसेसपच्चओ हुइओ, एयंपि भन्नइ 'जेसु ठाणेसु' त्ति, उवरिल्लपएण समं संबज्झइ । जेसु गुणट्ठाणेसु बंधोदयो जत्तिया अत्थि त्ति एयंपि एत्थ वुच्चइ ।। २ ।।

'बंध उदयं उदीरणाविधिं च' त्ति, विधिसद्दो पत्तेयं पत्तेयं संबज्झइ । बंधविगप्पो उदयविगप्पो उदीरणाविगप्पो य, ते जेसु ठाणेसु जत्तिया संभवंति तं भन्नति । बंधो त्ति सुहुमबायरेहिं पोग्गलेहिं घटघूमवत् णिरंतरं निचिते लोके कम्मजोग्गे पोग्गले [2]धेत्तुं सामन्नविसेसपच्चएण जीवपएसेसु कम्मत्ताते परिणामणं बंधो वुच्चइ । उक्तं च–

"[४५]जीवपरिणामहेउं कम्मतया पोग्गला परिणमंति । पोग्गलकम्मणिमित्तं जीवोवि तहेव परिणमइ ॥१॥"

इति चतुर्दशमार्गणास्थानानि । मृग्यन्ते जीवादय एष्विति। तत्र तिर्यग्गतौ चतुर्दशापि जीवस्थानानि भवन्ति। शेषासु नारकनरदेवगतिषु द्वे द्वे संज्ञिपर्याप्तापर्याप्तरूपे। अपर्याप्तो लब्ध्या करणेन द्विधापि। तत्र योऽपर्याप्त एव म्रियते स लब्ध्यपर्याप्तः। यस्तु करणादीनि नाद्यापि पूरयति, परं पूरयिष्यति स करणाऽपर्याप्तः। नरेष्वभयथापि भवति। नारकदेवयोः करणाऽपर्याप्त एव। असंज्ञ्यपर्याप्तो नरस्तु तिर्यग्गतौ ज्ञेयोऽल्पकालिकत्वाद्वा न तृतीयः प्रोक्तः। मार्गणास्थानेष्वेवं संक्षेपजीवस्थानानि ज्ञेयानि। 'इन्दिय' त्ति स्पर्शने सर्वाणि। रसने एकेन्द्रियसंभवीनि चत्वारि वर्जयित्वा शेषाणि दश। घ्राणे एक-द्वीन्द्रियसंभवीनि षड्वर्जयित्वा शेषाण्यष्टौ। चक्षुषि चतुः पंचेन्द्रियसंबंधीनि षट्। श्रवणे पंचेन्द्रियसंबंधीनि चत्वारि । 'काय' त्ति-पृथिव्यप्तेजोवायुवनस्पतिष्वेकेन्द्रियसंबंधीनि चत्वारि । त्रसेष्वेतानि वर्जयित्वा शेषाणि दश। 'जोए' त्ति मनोयोगे संज्ञिपर्याप्तरूप एक, वाग्योगे पर्याप्तद्वित्रिचतुरसंज्ञिसंज्ञिरूपाणि पंच, काये चतुर्दशापि, 'वेए' त्ति-स्त्रीपुंवेदयोः पर्याप्त-करणापर्याप्तसंज्ञ्यसंज्ञिरूपाणि चत्वारि। लब्ध्यपर्याप्तः सर्वोऽपि नपुंसक एव। यच्चात्रासंज्ञिनि स्त्रीपुंसाभिधानं तत्कार्मग्रंथिकमतेन न सैद्धान्तिकेन। नरासंज्ञिनस्तु लब्ध्यपर्याप्त एव। नपुंसके चतुर्दशापि। वेदाभावे संज्ञिपर्याप्तरूपमेकम्। 'कसाय' त्ति-तेषु चतुर्दशापि, अभावे संज्ञिपर्याप्तः। 'नाणे' त्ति-मतिश्रुतावधिषु संज्ञिपर्याप्तकरणापर्याप्तरूपे द्वे। लब्ध्यपर्याप्तस्तु मिथ्यादृगेव। ननु सासादनः समतिश्रुतः पृथिव्यादिषूत्पद्यते, कथं द्वे एव ? आह अशुद्धत्वान्न विवक्षितः। मनःपर्यायकेवलयोः संज्ञिपर्याप्त एकः, द्रव्यमनसा केवली संज्ञी। मतिश्रुताज्ञानयोः सर्वाणि, विभंगे संज्ञिपर्याप्तः करणापर्याप्तश्च। 'संजम' त्ति-सामायिक

१ छेद २ परिहार ३ सूक्ष्म ४ यथाख्यात ५ देशविरतेषु ६ पर्याप्तसंज्ञी एकः। असंजमे चतुर्दश। 'दंसण' त्ति-चक्षुर्दर्शने पर्याप्तचतुरसंज्ञिसंज्ञिरूपाणि त्रीणि, करणापर्याप्तत्वे षडित्येके। अचक्षुःषि चतुर्दश। अवधौ-अवधिज्ञानवत्। केवले केवलज्ञानवत्। लेस' त्ति-कृष्णनीलकापोतासु चतुर्दश। तेजःपद्मशुक्लासु संज्ञिपर्याप्तः करणापर्याप्तश्च। देवच्युतः करणापर्याप्त एकेन्द्रियः तूर्णिकृतात्पकालिकत्वान्न विवक्षितः। 'भव' त्ति-भव्याभव्ययोश्चतुर्दशापि। 'सम्म' त्ति क्षायिक-वेदक-क्षयोपशमिकेषु संज्ञिपर्याप्तः करणापर्याप्तश्च। कथं? कश्चित् बद्धायुष्कः क्षायिकं कश्चित् क्षप्यमाणक्षायोपशमिकश्चरमग्रासरूपं वेदकं चोत्पाद्य गतिचतुष्केष्वपर्याप्तः क्षायिकोवेदकश्च लभ्यते, क्षायोपशमिकस्तु देवेभ्यश्च्युतस्तीर्थंकरादिः। औपशमिके-पर्याप्तः संज्ञी, अपर्याप्तमपि केचित्। सासादने लब्धिपर्याप्ताः करणेन त्वपर्याप्ताः बादरैकद्वित्रिचतुरसंज्ञिनो लभ्यन्ते, संज्ञी लब्ध्या पर्याप्त एव, करणेन त्वपर्याप्तः पर्याप्तश्च। मिश्रे करणपर्याप्तः संज्ञी। मिथ्यात्वे चतुर्दश। 'सन्नि' त्ति संज्ञिनि पर्याप्तापर्याप्तरूपे द्वे, असंज्ञिनि-द्वादश। 'आहारे' त्ति-आहारके चतुर्दश, अनाहारके [अपर्याप्त] सूक्ष्मबादरैकेन्द्रियद्वित्रिचतुरसंज्ञिसंज्ञिरूपाणि विग्रहगतौ सप्त; [पर्याप्तः] संज्ञी केवलिसमुद्घाते ॥७॥ जीवस्थानेषूपयोगानाह—

एक्कारसेसु तिगतिग दोसु चउक्कं च बारगंसेमि ।
जीवसमासेसेवं उवओगविही मुणेयव्वा ॥ ८ ॥

पर्याप्तचतुरसंज्ञिसंज्ञिवर्जेष्वेकादशसु मतिश्रुताज्ञानाचक्षुर्दर्शनरूपास्त्रयः। द्वयोश्चतुरसंज्ञिनोस्तु त एव चक्षुर्दर्शनेन सह चत्वारः। एकस्मिन्संज्ञिपर्याप्ते द्वादश करणापर्याप्तस्(तीर्थंकरः) पर्याप्तत्वेन गृहीत. ॥८॥ जीवस्थानेषु योगानाह--

नवसु चउक्के एक्के योगा एक्को य दुन्नि पन्नरस ।
तब्भवगएसु एए भवंतरगएसु काओगो ॥ ९ ॥

यथासंख्यं सूक्ष्मबादरपर्याप्तापर्याप्तैकेन्द्रिय ४ द्वित्रिचतुरसंज्ञिसंज्ञ्यपर्याप्ताः ५ एषु नवस्वेकः काययोगः सामान्यतः। विशेषतस्तु लब्ध्या करणेन चापर्याप्तेषु सप्तस्वप्यौदारिकमिश्रः॥ पर्याप्तस्य सूक्ष्मबादरैकेन्द्रियस्य वायुवर्जस्यौदारिकः। वायोस्तु बादरपर्याप्तस्य वैक्रियः २ मिश्रौदारिकश्च लभ्यते। चतुष्के करणपर्याप्तद्वित्रिचतुरसंज्ञिरूपे द्वौ औदारिक १ असत्यामृषावाक् च २ एकस्मिन् पर्याप्तसंज्ञिनि पंचदशापि। तद्भवगतेष्वेते। भवान्तरगतेषु तु विग्रहगतौ एकः कार्मणकाययोगः॥९॥

उवओगा योगविही जीवसमासेसु वन्निया एए ।
एत्तो गुणेहि सह परिगयाणि ठाणाणि मे सुणह ॥ १० ॥

कण्ठ्य॥१०॥

मिच्छद्दिट्ठी-सासण मिस्से अजए य देसविरए य ।
नव संजएसु एए चउदसगुणनामठाणाणि ॥ ११ ॥

मिथ्या-विपर्यस्तं दर्शनम्-सम्यक्त्वं यत्र स मिथ्यादृष्टिः, तस्य गुणस्थानम् किंचिद् ज्ञानसद्भावादन्यथा जीवस्याजीवत्वं स्यात्। अनाद्यनन्तमभव्यानाम्, अनादिसान्तं भव्यानाम् सादिसान्तं [सम्यक्त्वपतितानाम्] ज० अंतर्मुहूर्तम् [उ० अपार्धपुद्गलपरावर्तम्,] ॥१॥ आयम्--औपशमिकलाभं सादयति आसादनम्, नैरुक्तो यलोपः, सह आसादनेन वर्तते १ सह आसातनया अनन्तानुबंधिरूपया वा वर्तते

सासादनः २ सह सम्यक्त्वरसास्वादनेन वर्तते सास्वादनः ३ स चासौ सम्यग्दृष्टिश्च तस्य गु० ज० समयः । उ० षडावलिकाः । कथं ? ग्रन्थिभेदानन्तरं जन्तुः स्थितित्रयमित्थं करोति ॥

△ △△△

अन्तरकर०
अनिवृत्ति०
अपूर्वकर०
यथाप्रवृत्त०

□

प्रथमान्तर्मुहूर्तं मिथ्यात्वे तत्रापूर्वानिवृत्त्यन्तेऽन्तरकरणाद्यसमये औपशमिकस्तस्यान्तर्मुहूर्तान्त्यसमये षडावलिकासु वा औपशमिकं (त्य)जन् उपशमश्रेणिप्रतिपतितो वा सासादने वर्तते ॥२॥

सम्यक् च मिथ्या च दृष्टिर्यस्य स सम्यग्मिथ्यादृष्टिस्तस्य गु० औपशमिकादित्थं △ ▲ ◬ शुद्धार्धविशुद्धाशुद्धत्रिकं जीवकरणादेतस्मिन् कश्चिद्गच्छति अन्तर्मुहूर्तम् । ततो मिथ्यात्व सम्यक्त्वं वा । सैद्धान्तिकास्तु सम्यक्त्वान् मिथ्यात्वं याति न मिश्रमित्याहुः ॥३॥

विरमति स्म सावद्यात् विरत, गत्यर्थेति कर्तरि क्तः । न विरतो [ऽविरतः] स चासौ सम्यग् जानन्नपि द्वितीयकषायोदयाद् विरतिं न लाति ।ज० अन्तर्मुहूर्तं, उ० सागरास्त्रयस्त्रिंशत्साधिकाः ॥४॥

देशे विरतं यस्य स देशविरतः । तृतीयकषायोदयात् सर्वविरतिं नाप्नोति । ज० अन्तर्मुहूर्तं उ० देशोनपूर्वकोटिः ॥५॥

प्रमाद्यति स्म प्रमत्तः स चासौ संयतश्च प्र० तस्य गु० ज० समयः उ० अन्तर्मुहूर्तम्, (६) ।

न प्रमत्तं अस्य अस्ति अप्रमत्त; अर्शादेर्मत्वर्थीयोऽच् । अन्तमुहूर्तम् ॥७॥

अपूर्वकरणक.ल [लान्ते]एव निधत्तनिकाचने गते । अपूर्व करणं स्थितिघात [1]रसघात [2]गुणश्रेणि [3]-गुणसंक्रम [4] स्थितिबंधेषु [5]यस्य सो अपूर्वकरणः । तत्र द्वयं सुगमम् । १-२ । उपरितनस्थितेर्विशुद्धितोऽवतारितस्य दलिकस्यान्तर्मुहूर्तम् उदयक्षणादुपरि क्षिप्रतर क्षपणाय प्रतिक्षणमसंख्येयगुणवृद्धया विरचनं गुणश्रेणिः । ३ । स्थापना △▽ एषा पूर्वगुणेषु कालतो दीर्घा वलिकरपृथ्वी । अत्र अ[च] कालतो ह्रस्वा दलिकै. पृथुतरा बध्यमानशुभाशुभप्रकृतिषु अबध्यमानाशुभप्रकृतिदलिकस्य प्रतिक्षणमसंख्येयगुणवृद्धया विशुद्धिवशान्नयनं गुणसंक्रमः ।४। कर्मणामशुद्धत्वात्पूर्वं दीर्घां स्थितिमत्र तु ह्रस्वां बध्नाति स्थितिबन्धः ।५। उदयोद्वर्तने अप्यत्रापूर्वे । अयं च द्विधा क्षपक उपशमको वा, अर्हत्वात् । न त्वसौ क्षपयति उपशमयति वा । अत्र च प्रविष्टानामसंख्येयलोकाकाशप्रदेशप्रमाणान्यध्यवसायस्थानानि स्युः, अध्यवसायनिवर्तनान्निवृत्तिरप्येतत् ॥८॥

युगपदिदं प्रविष्टानां शुद्धाध्यवसायनिवृत्तिर्नास्ति इति अनिवृत्तिः । बादरः स्थूलः संपरायः कषायोदयो यत्रासौ बादरसंपरायः अनिवृत्तिश्चासौ बादरसंपरायश्च अनिवृत्तिबादरसंपरायः, तस्य गु० ९ ॥अ०॥ अन्तर्मुहूर्तमानेऽस्मिन् यावन्तः समयाः तावन्त्यध्यवसायस्थानानि । एकसमये प्रविष्टा[ना]मेकमेवाध्यवसायस्थानं ॥ अत्र क्षपक उपशमको वा । अयं क्रोधमानमायासम्बन्धिनीः किट्टीर्लोभस्य तु बादरा किट्टीः क्षपयति । लोभस्य तु सूक्ष्माः सूक्ष्मसंपराये । तत्र सर्वजीवानन्तगुणरसयुक्तस्तावदेकोपि परमाणुस्ते. सिद्धानन्त(भ्र)मागवर्तिभिरभव्येभ्योऽनन्तगुणैः समरसैः परमाणुभिः कर्मस्कन्धास्तैर्वर्गणास्ततः स्पर्द्धकानि तेषामनन्तरसक्षयेऽन्तराणकिट्टीत्यन्ते ॥९॥

सूक्ष्मसम्परायः किट्टीकृतलोभोदयो यस्य स सूक्ष्मसंपरायः (ज०) क्ष० उ० अन्तर्मुहूर्तम् ॥१०॥

छाद्यते केवलं ज्ञानम् दर्शनं चात्मनो(ऽने)नेति छद्म तत्र तिष्ठति छद्मस्थः । वीतरागो मायालोभोदयरहितः । स क्षीणकषायोऽपि स्यात् अत उपशान्तकषायवितरागछद्मस्थः तस्य गु० । अत्रोपशमश्रेणिक्रमो वाच्यः । ज० स० उ० अन्तर्मुहूर्तम् ॥११॥ .... ॥१२॥

योगो वीर्यम् सह योगेन वर्तते सयोगः । सयोगी वा सर्वधनादेर्मत्वर्थीयेन० । स त्रिधा केवली मनःपर्यायैरनुत्तरसुरैश्च मनसा पृष्टा[ष्टो] मनसैवोत्तरं दत्ते, वाचा देशनां विधत्ते, कायेन कामति । देशोनां पूर्वकोटिं । ज० अन्तर्मुहूर्तम् ।।१३।। नास्ति योगो अस्य असौ अयोगो अयोगी वा त्रिधापि योगः ।।१४।।११।।

卐 [सुरनारएसु चत्तारि हुंति तिरिएसु जाण पंचेव ।
मुणयगईए वि तहा चोद्दसगुणनामठाणाणि ।।१२।।

गाथा कण्ठ्या । गतिमार्गणासु गाथायामेवदर्शितत्वात् शेषेन्द्रियादिमार्गणासु गुणस्थानानि दर्श्यन्ते] इन्द्रियमार्गणा तत्रैकद्वित्रिचतुःपञ्चेन्द्रियेषु पर्याप्तापर्याप्तेषु मिथ्यादृष्टिर्लभ्यते । तेजो वायुवर्जप्रत्येकबादरैकेन्द्रिय-द्वित्रिचतुरसंज्ञिषु लब्ध्या पर्याप्तेषु करणेन त्वपर्याप्तेषु संज्ञिषु लब्ध्या पर्याप्तेषु करणेन तु पर्याप्ताऽपर्याप्तेषु सासादनः । शेषाणि मिश्रादीनि संज्ञिनि करणपर्याप्ते लभ्यन्ते । परं अविरते करणापर्याप्तोऽपि ।।२।। काये-पृथ्व्यादौ षड्विधेऽपि मिथ्यादृष्टिर्लभ्यते । बादरपृथ्व्यप्प्रत्येकवनस्पतिषु लब्ध्या पर्याप्तेषु करणेनापर्याप्तेषु, त्रसेषु लब्ध्या पर्याप्तेषु करणेन त्वपर्याप्तपर्याप्तकेषु सासादनः । शेषाणि मिश्रादीनि १२ करणपर्याप्तेषु, परमविरतः करणाऽपर्याप्तपर्याप्तेषु च ।।३।। योगेत्रिविधेऽपि अयोगिवर्जाणि(नि) त्रयोदश ।।४।। वेदे,निवृत्त्यन्तानि अष्टौ, अनिवृत्तिस्तु यावद् वेदान् न क्षपयति उपशमयति वा तावद्गुणस्थानसंख्येयभागान् यावल्लभ्यते । तत ऊर्ध्वं सर्वेऽपि अवेदकाः ।।५।। आद्यकषायेषु त्रिषु निवृत्त्यन्तान्यष्टौ अनिवृत्तिरपि यावन्न क्षपयति उपशमयति वा । लोभे तु सूक्ष्मान्तानि दश । उपर्यकषायाः ।।६।। मतिश्रुतावधिष्वविरतादीनि क्षीणमोहान्तानि नव । मनःपर्याये प्रमत्तादीनि क्षीणमोहान्तानि सप्त । केवले सयोग्ययोगिद्वयं । अज्ञानत्रये मिथ्यात्व-सासादने ।।७।। सामायिक-छेदयोः प्रमत्तादीनि चत्वारि । परिहारे प्रमत्ताप्रमत्तद्वयं । सूक्ष्मे सूक्ष्ममेकम् । यथाख्याते तूपशान्तादीनि चत्वारि । असंयमे मिथ्यात्वादीनि चत्वारि । संयमासंयमे देशविरतमेकम् ।।८।। चक्षुरचक्षुर्दर्शनयोर्मिथ्यात्वादीनि द्वादश । अवधिदर्शने त्वविरतादीनि नव, प्रज्ञप्तौ तु मिथ्यादृष्ट्यादीनामप्यवधिदर्शममुक्तम् । एवं यदा सासादने मिश्रे वा विभंगज्ञानी तदा अवधिदर्शनमपि इत्यत्र क्षीणमोहान्तानि द्वादश । ये तु मिथ्यादृष्ट्यादीनामवधिदर्शनं न मन्यन्ते तत्र कारणं न विद्मः । केवलदर्शने सयोग्ययोगिद्वयं ।।९।। षडपि लेश्या आद्यगुणस्थानचतुष्के केचिद्देशयतप्रमत्तयोरपि मन्यन्ते । यतः कृष्णनीलकापोतानामप्यसंख्येयलोकाकाशप्रदेशप्रमाणान्यध्यवसायस्थानानि, मन्दक्लेशेषु च तेषु विरतेरपि भावात् । देशयतप्रमत्ताप्रमत्तास्तूपरितनलेश्यात्रये । निवृत्त्यादयः सयोग्यन्ताः शुक्लायामेव । अयोगिस्त्वलेश्यः ।।१०।। भवेषु (भव्येषु) चतुर्दशापि । अभव्येषु मिथ्यादृष्टिरेकम् ।।११।। क्षायिकेऽविरतादयोऽयोग्यन्ताः । क्षायोपशमिकेऽविरतदेशप्रमत्ताप्रमत्ताः । औपशमिकेऽविरतादय उपशान्तान्ताः । मिथ्यादृष्टिमिथ्यात्वे । सासादनः सासादने । मिश्रो मिश्रे ।।१२।। संज्ञ्यसंज्ञिषु मिथ्यादृक्सासादने । मिश्रादयः क्षीणान्ताः संज्ञिष्वेव । सयोग्ययोगी च न संज्ञी नाऽप्यसंज्ञी ।।१३।। मिथ्यादृक्सासादनाविरतसयोगिन आहारकेष्वनाहारकेषु च । अनाहारत्वं केवलिनः समुद्घाते । शेषाणां विग्रहगतौ । अन्ये त्वयोगिवर्जा मिश्रादय आहारका एव विग्रहाभावात् ।।१२।। गुणेषूपयोगानाह—

दुण्हं पंचउ छच्चेव दोसु एक्कंमि होंति वा मिस्सा ।
सत्त चउणा [सत्तुवओगा] सत्तसु दो चेव य दोसु ठाणेसु ।।१३।।

द्वयोः मिथ्यात्वसासादनयोः पञ्चैवोपयोगा अज्ञानत्रयं चक्षुरचक्षुर्दर्शने च, केचिदवधिदर्शन-

卐 कोष्ठद्वयान्तरगतो गाथायुक्तपाठ; प्रतौ नास्ति तथाप्यत्र संभाव्यतेऽतो लिखितः ।

मपोच्छन्ति षष्ठम् । अविरतदेशविरतद्वये षडेव । मतिश्रुतावधिज्ञानानि ३ चक्षुरचक्षुरवधिदर्शनानि ३ एकस्मिन्मिश्रे षडेवेति संबध्यते, अज्ञानत्रयं चक्षुरचक्षुरवधिदर्शनत्रयं च ६ व्यामिश्रा सम्यक्त्व-मिथ्यात्वसंवलितत्वात् । सप्तोपयोगाः सप्तसु प्रमत्तादिक्षीणान्तेषु आद्यज्ञानत्रयं दर्शनत्रयं मनःपर्ययं च ॥७॥ द्वयोः सयोग्ययोगिनोः स्थानयोः केवलज्ञानकेवलदर्शने द्वे एव ॥१३॥ गुणेषु योगा एकमतेनाह–

निसु तेरस एगे दस नव योगा हुन्ति सत्तसु गुणेसु ।
एक्कारस य पमत्ते सत्त सयोगे अयोगिक्कं ॥ १४ ॥

त्रिषु मिथ्यात्वसासादनाविरतेषु मनश्चतुर्वाक् च ॥८॥ औदारिकवैक्रियौ पर्याप्तेषु औदारिक-वैक्रियमिश्रौ अपर्याप्तेषु कार्मणो विग्रहे त्रयोदश । अत्र मते वैक्रियोऽविरतान्तानामेव न देशविरतादीनां लब्ध्याभावात् । एकस्मिन्मिश्रे अष्टौ मनोवाक्योगा औदारिकवैक्रियौ च दश । नन्वस्य कालकरणा-भावात् मा भूत् कार्मणम् लब्धिप्रत्ययौदारिकवैक्रियमिश्रौ कस्मान्न भवतः ? सत्यं, किन्तु कुतोऽपि कारणान्नोक्ताविति न विद्मः । सप्तसु देशविरताप्रमत्तक्षीणान्तेषु नव २ अष्टौ मनोवाक्योगा औदारिक-श्चेति, तद्भावे नैषाम् जन्मान्तरमिति न कार्मणऔदारिकमिश्रौ आहारकमप्रमत्तस्य किमिति न ? चेदुच्यते । अत्र मते आहारकस्यारम्भे समाप्तौ वा प्रमत्त एव लब्ध्युपजीवनात् । एकादश प्रमत्ते नव पूर्वोक्ता एव आहारकद्विकं च । सयोगि[नि] सप्त । सत्यं मनो असत्यामृषं मनो, वाक् च ४, औदारिकः तन्मिश्रकार्मणौ समुद्घाते ७, अयोगमेकं अयोगिस्थानं लुप्तविभक्तिकम् ॥१४॥ ये तु देशविरतादीनामपि वैक्रियं आहारकसमाप्त्युत्तरं संयतस्याप्रमत्तत्वमिच्छन्ति ते इत्थं पठन्ति––

तेरस चउसु दसंगे पंचसु नव दोसु होंति एक्कारा ।
एक्कंमि सत्त योगा अयोगिठाणं हवइ एक्कं ॥ १५ ॥

तत्र चतुर्थः प्रमत्तः । एकादश पूर्वोक्ता एव वैक्रियद्विकेन सह त्रयोदशः, अत्र मते देशविरता-दीनामपि वैक्रियाभ्युपगमः। 'दसंगेनि'पूर्ववत् । अन्यच्च पूर्वमते नव २ योगा उक्ता. अत्र तु देशविरता-प्रमत्तवर्जेषु पञ्चसु, तयोस्तु 'दोसु होंति एक्कारा' तत्र देशविरतस्य वैक्रियद्विकेन सहोक्ता एव । अप्रमत्तस्य नव पूर्वोक्ता आहारकवैक्रिययुता एकादश । अनयोरारम्भे प्रमत्तस्ततोऽप्रमत्तः, ननु पूर्वमते-ऽवंडादीनां श्रुत्वा वैक्रियमनयोः किं नोक्तम् ? अल्पत्वात् । शेषं कण्ठ्यम् ॥१५॥

'जप्पच्चईउ' इत्याह––

चउ पच्चइओ बंधो पढमे उवरिमतिगे तिपच्चई उ ।
मीसगबीओ उवरिमदुगं च देसेक्कदेसम्मि ॥ १६ ॥
उवरिल्लपंचगे पुण दुपच्चओ जोगपच्चओ तिण्हं ।
सामन्नपच्चया खलु अट्ठण्हं होंति कम्माणं ॥ १७ ॥

प्रत्ययाः बन्धहेतवः, ते सामान्यतश्चत्वारः, मिथ्यात्वमविरतिः कषाया योगाश्चेति । तत्र मिथ्यात्वं पञ्चधा– एकान्तं १ वैनयिकं २ सांशयिकं ३ मूढं ४ विपरीतं ५, तत्र अनन्तधर्माध्यासिते वस्तुन्येकांशावधारणमेकान्तं, यथा अस्ति नास्ति एव वा जीव इति ॥१॥ ऐहिकामुष्मिकं सुखं विनय-वानेव लभते न ज्ञानोपवासब्रह्मचर्यकष्टादिरयभिनिवेशो वैनयिकम् ।२। अर्हता जीवादितत्त्वमुक्तं किं स्यात् न वेति सांशयिकं ।३। पृथ्व्यादीनां मूढं ।४। हिंसादीनां दुःखफलत्वेऽपि सुखाभिनिवेशो विपरीतम् ॥५॥ यथा–

सत्यं वच्मि हितं वच्मि सारं वच्मि पुनः पुनः । असारेऽस्मिन् [अस्मिन्नसार]संसारे सारं सारङ्गलोचना ॥
मिथ्यादर्शनमेवास्तु किमन्यैर्दर्शनान्तरैः । निर्वाणं प्राप्यते येन सरागेणाऽपि चेतसा ॥

अविरतिर्द्वादशधा । इन्द्रियमनसामनियन्त्रणं षोढा, षड्जीववधश्च १२ ॥२॥ कषायाः षोडश नोकषायनवकं च । २५ ॥३॥ योगाः पूर्वोक्ताः पञ्चदश ।४॥ सर्वेऽपि सप्तपञ्चाशत् । तत्र चतुः प्रत्ययोऽपि बन्धः प्रथमे मिथ्यादृष्टौ चतुर्भिरपि सोत्तरभेदैर्ज्ञानावरणादिकं स कर्म बध्नाति, परं संयमाभावात् आहारकद्विकाऽपगमे पञ्चपञ्चाशदुत्तरभेदाः । उपरितनत्रिके सासादनमिश्राविरतिरूपे त्रिप्रत्ययो मिथ्यात्वाभावात् तत्पञ्चकापगमे सासादनस्य पञ्चाशत् . मिश्रस्य मृत्योरभावात् कार्मणमौदारिकवैक्रियमिश्रे अनन्तानुबन्धिचतुष्कं च नास्ति, तदपगमे त्रिचत्वारिंशत् । अविरतस्य मृत्योर्भावात् कार्मणमौदारिकवैक्रियमिश्रे च क्षिप्यन्ते, षट्चत्वारिंशत् भेदा । 'मीसग बीउ' त्ति द्वितीयोऽविरतिर्हेतुः समिश्रकोऽसंपूर्ण त्रसवधान्निवृत्तत्वान्न द्वादशधा । उपरितनद्विकं च कषाययोगरूपम्। देशवि र(तः) तत्राऽप्रत्याख्यानाश्चत्वारो विग्रहेऽपर्याप्तत्वे देशविरतेरभावान्न कार्मणौदारिकमिश्रे ६ त्रससंयमश्चास्येति सप्तकापगमे एकोनचत्वारिंशद् । प्र गृ हिणः सनप्पारभंजत्रसासंजमो न विवक्षितोऽशक्यपरिहारत्वात् । संकल्पजस्त्वंगीकृतो बृहच्चूर्णौ । 'उवरिल्ल' त्ति, उपरितनपञ्चके प्रमत्तादौ सूक्ष्मान्ते द्विः, कषाय १ योग २ प्रत्ययः । तत्र प्रमत्तस्य संज्वलनाः ४ नोकषायाः ९ योगाः कार्म्मणौदारिकमिश्रवर्जाः १३ सर्वे २६ ।

पणमिच्छअ रअविरयदुवालसकसायकम्मुरलमिस्से । पवमिगतीसरहिया छव्वीस पमत्तगुणठाणे ॥ उत्तरभेदाः

अप्रमत्तस्य वैक्रियमिश्राहारकमिश्रापगमे २४ । निवृत्तेः शुद्धत्वाद् वैक्रियाहारकापगमे २२ । अनिवृत्तौ हास्यषट्कापगमे १६ । वेदत्रयकषायत्रयापगमे तु १० सूक्ष्मे सूक्ष्मलोभक्षयात्तव, योगप्रत्ययस्त्रयाणामुपशान्तक्षीणसयोगिनाम् । तत्राऽष्टौ मनोवाग्योगा औदारिकश्चेति, प्रत्येकमुपशान्तक्षीणयोर्नव । सयोगे त्वाद्यन्तं मनो वाक् च ४ औदारिक२०मिश्रकार्मणानि सप्त । अयोगी त्वबन्धकः । अर्थं कण्ठ्यम् ॥१६-१७॥ विशेषहेतुमाह–

पडणीयमंतराइय उवघाए तप्पओसनिन्हवणे ।
आवरणदुगं भूओ बंधइ अच्चासणाए य ॥१८॥

आवरणद्विकं ज्ञानदर्शनावरणरूपं तच्च ज्ञानस्य ज्ञानिनां पुस्तकादीनां च प्रत्यनीकतया अनिष्टाचरणेन भूयोऽतितीव्रं बध्नाति कर्म । तथाऽन्तरायेण भक्तपानवस्त्रोपाश्रयलाभाविवारणेन । उपघातेन मूलतो विनाशेन । तत्प्रद्वेषेण अप्रीत्या । निह्नवेन न मया तत्समीपेऽधीतमित्यादिरूपेण । अत्याशातनया जात्याद्युद्घट्टनादिहीलनया । ज्ञान्यवर्णवादाकालस्वाध्यायादिभिः पञ्चाश्रवैरप्येतद् बध्यते । एवं दर्शनावरणेऽपि तदभिलापेन वाच्यम् । तथाहि–दर्शनस्य चक्षुर्दर्शनादेर्दर्शनिनां साध्वादीनां तत्साधनस्य श्रोत्रादेः प्रत्यनीकतयेत्यादि ॥१८॥

वेदनीयहेतूनाह—

भूयाणुकंपवयजोग उज्जुओ खंतिदाणगुरुभत्तो ।
बंधइ भूओ सायं विवरीए बंधई (ए) इयरं ॥१९॥

भूतानुकंपी, व्रते महाव्रतादिषु, योगेषु सामाचार्यादिषूद्यतः । सत्वर्थीयलोपात् क्षान्तिदानवान् । गुरुभक्तश्च, किं बध्नाति भूयस्तीव्रं सातम् । विपरीते त्वसातम् ॥१९॥ दर्शनमोहहेतूनाह—

अरिहन्तसिद्धचेइयतवसुयगुरुसाहुसंघपडणीओ ।
बंधइ दंसणमोहं अणंतसंसारिओ जेण ॥ २० ॥

अर्हत्सिद्धचैत्यतपःश्रुतगुरुसाधुसंघानां प्रत्यनीकोऽवर्णवादी बध्नाति दर्शनमोहम् , येन बद्धेनाऽनंतसंसारिको भवति जीवः । उन्मार्गदेशनया चैत्यमुनिद्रव्यलोपेन तत्त्वनिह्नवेन ॥२०॥ चारित्रमोहमाह-

तिव्वकसाओ बहुमोहपरिणओ रागदोससंजुत्तो ।
बंधइ चरित्तमोहं दुविहं पि चरित्तगुणघाई ॥ २१ ॥

तीव्रकषायो यमेव कषायं तीव्रं करोति तमेव बध्नाति नोकषायांश्च । तथाहि-कोपनो ऽहंकारी, परदाररतो-ऽलीकभाषी, ईर्ष्यालुर्मायावान् स्त्रीवेदम् । ऋजुर्मन्दकोपो मार्दवी, स्वदारतुष्टो ऽमायावी पुंस्त्वम् । पिशुनो निर्लञ्छन-वध-ताडनरतः स्त्रीपुमंग(ल)सेवी [स्त्रीपुमनंगसेवी] धर्मध्वंसी तीव्रविषयरतिर्नपुंसकत्वमर्जयति ।

हसनहासनशीलो, विप्लावकन्दर्प्परि[र]तिप्रियो हास्यमोहम् । क्रीडति क्रीडयति सुखोत्पादको रतिम् । रतिहन्ता पापरतिररतिम् । शोचति शोचयति व्यसनशोकाभिनंदी शोकम् । बिभेति भीषयते भयम् । जुगुप्सते जुगुप्सां जनयति परिवादशीलो जुगुप्सां रचयति । बहुमोहपरिणतो विषयगृद्धि विभ्रमितमतिः । रागो हास्यरत्यादयः । द्वेषो जुगुप्सादय ताभ्यां संयुक्तः । बध्नाति चारित्रमोहम् । 'चारित्रगुणघाति' लब्धमपि चारित्रगुणं हंति । यद् द्विविधमपि कषायनोकषायरुपम् ॥२१॥ नरकादिहेतूनाह-

मिच्छादिट्ठिमहारम्भ परिग्गहो तिव्वलोह नीसोलो ।
नरयाउयं निबंधइ पावमई रुद्दपरिणामो ॥ २२ ॥

मिथ्यादृष्टिः सद्धर्मत्यक्तः । महारम्भपरिग्रहस्तीव्रलोभो निःशीलो नरकायुर्नितरां बध्नाति पापमती रौद्रपरिणामश्च पर्वतराजिकषाय. ॥२२॥

उम्मग्गदेसओ मग्गनासओ गूढहियय माइल्लो ।
सढसीलो य ससल्लो तिरियाउं बंधए जीवो ॥ २३ ॥

मार्गो ज्ञानादिकस्तमतिक्रम्य देशकोऽत एव मार्गनाशकः । गूढहृदय-उदायिनृपमारकादिवत् । माइल्लोबहिश्चेष्टः । शठशीलो-मुखमृष्टश्चित्तदुष्ट. । सशल्योऽनालोचिताप्रतिक्रा-तः । क्षितिभेदकषायस्तिर्यगायुर्बध्नाति जीवः ॥२३॥

पयईइ तणुकसाओ दाणरओ सीलसंजमविहूणो ।
मज्झिमगुणेहि जुत्तो मणुयाउं बंधए जीवो ॥ २४॥

रेणुराजितनुकषायः । भद्रको विनीतो दानरतश्च शीलसंयमरहितस्तद्वान्हि देवायुर्बध्नाति । मध्यमगुणैः क्षान्त्यादिभिर्युक्तो मनुष्यायुर्बध्नाति जीवः ॥२४॥

अणुव्वयमहव्वएहिं बालतवाकामनिज्जराए य ।
देवाउयं निबंधइ सम्मद्दिट्ठी य जो जीवो ॥ २५ ॥

अणुव्रतोऽविराधितश्रावकः । महाव्रतः सरागसयतः । वीतरागस्तु शुद्धत्वान्नायुर्बध्नाति बालतपोऽज्ञानकृततपाः कष्टेन मिथ्यादृष्टयोऽपि देवेषु यान्ति । अकामस्यानिच्छतो निर्जरा--क्षुत्तृष्णाद्यासी शी]

तातपवंशमलपंकरोगबन्धसहनेन गिरितरुद्रालनपातादिभिरुबकराजिसमकषायो देवायुर्निबध्नाति। सम्यग्दृष्टिरविरतोऽविराधितव्रतश्च यो जीवः ॥२५॥ नामकर्मनिकषाऽपि शुभाशुभभेदाद् द्वेधा तद्धेतूनाह—

मणवयणकायवंको माइल्लो गारवेहि पडिबद्धो ।
असुहं बंधइ नामं तप्पडिवक्खेहि सुहनामं ॥ २६॥

मनोवचनकायैर्वक्रः क्रोधाविष्टः प्राण्यंगोपांगादिविनाशकः, मायावान्, ऋद्धिरससातरूपैर्गौरवैः प्रतिबद्धः। शेष कण्ठयम् ॥२६॥ गोत्रयोर्हेतूनाह

अरहंताइसु भत्तो सुत्तरुई पयणुमाण गुणपेही ।
बंधइ उच्चागोयं विवरीए बंधए नीयं ॥ २७॥

अर्हत्सिद्धाचार्योपाध्यायसाधुचैत्यानां भक्तः, सूत्रमागमस्तद्रुचिः, पठति पाठयति च। प्रतनुमानो जात्याद्यनहंकारः। गुणप्रेक्षी गुणं पुरस्करोति न दोषम्। समस्तं विभक्तिलोपो वा। शेषं कण्ठयम् ॥२७॥
अन्तरायहेतूनाह--

पाणिवहाईसु रओ जिणपूया मोक्खमग्गविग्घयरो।
अज्जेइ अंतरायं न लहइ जेणच्छियं लाहं ॥ २८॥

प्राणिवधादिषु रतः, तथा 'पुष्पाद्यैः सावद्यैषा त्यज' इति कुदेशनया गृहिणां जिनपूजा निषेधकः। मोक्षमार्गस्य ज्ञानादेः साधूनां वा लाभान्तरायं करोति। तथाऽन्यसत्वानां दानलाभभोगोपभोगविघ्नं करोति मन्त्रादिभिर्वीर्यं हन्ति सोऽर्जयत्यन्तरायम्, न लभते येनेप्सितं लाभम् ॥२८॥
येषु स्थानेषु बंधोदयोदीरणाविधिमाह—

बंधठाणा(णि) चउरो ७।८।६।१। तिन्निय उदयस्स ८।७।४। हुन्ति ठाणाणि।
पंच य उदीरणाए ७।८।६।५।२। संजोयमओ परं वुच्छं ॥२९॥ प्रक्षेपगाथा

यथोद्देशं निर्देश इति बन्धस्थानानि गुणेष्वाह—

छसु ठाणगेसु सत्तट्ठविहं बंधंति तिसु य सत्तविहं।
छव्विहमेगो तिन्नेग बंधगाऽबंधगो एगो ॥ ३०॥

षट्सु मिथ्यात्वसासादनाविरतदेशप्रमत्ताप्रमत्तेषु जीवा आयुर्बन्धकालादन्यत्र सप्तधा आयुर्बन्धे त्वष्टधा बध्नन्ति। त्रिषु तु मिश्रनिवृत्यनिवृत्तिषु सप्तधा आयुर्बन्धाऽभावात्। एकः सूक्ष्मो मोहायुर्वर्जाः षडेव, मोहनीयं बादरसंपरायहेतुकमिति। त्रय उपशान्तक्षीणसयोगिन एकं सातम्। एकोऽयोगीत्यबन्धकः ॥३०॥ उदयविधिमाह—

सत्तट्ठविह छ[विह]बंधगावि वेयंति अट्ठगं नियमा।
एगविह बंधगो उण चत्तारि व सत्त वेयंति ॥ ३१॥

यथासंभवं ये सप्ताष्टषड्विधबन्धकाः सूक्ष्मान्ता उक्तास्ते नियमादष्टधा वेदयन्ति। एकविधबन्धका उपशान्तक्षीणसयोगिनः। पुनश्चत्वारि सप्त वा २। सयोगो भवोपग्राहीणि चत्वारि। उपशान्तक्षीणास्तु मोहाऽभावात् सप्त। चाशब्दादयोगी भवोपग्राहीणि चत्वारि वेदयति ॥३१॥
उदीरणामेवाह—

मिच्छाविट्ठिप्पभिई अट्ठ उईरंति जा पमत्तो त्ति ।
अद्धावलियासेसे तहेव सत्तेवुईरंति ॥ ३२ ॥

मिथ्यादृष्टयादयः प्रमत्तान्ताः यावदद्धाव्यावलिकाशेषमायुर्न भवति तावदष्टावुदीरयन्ति । तदुदीरणाध्यवसायस्य सर्वेष्वपि भावात् । अद्धाकालस्तदावलिकाशेषे त्वायुष्यायुर्वर्जाः सप्तैव । यथा पूर्वम्, आवलिकाशेषस्यायुष उदीरणा प्रतिषिद्धा । अत्राविशेषोक्तावपि मिश्रोऽष्टौ [ष्टाए] वोदीरयति । स ह्यायुष्यन्तर्मुहूर्तविशेष एव मिश्रत्वं परित्यज्य सम्यक्त्वं मिथ्यात्वं वा याति ततो ना(न)वलिकाशेषत्वम् ।।३२।।

वेयणियाउववज्जे छकम्म उईरयंति चत्तारि ।
अद्धावलियासेसे सुहुमु उईरेइ पंचेव ॥ ३३ ॥

वेदनी[य]आयुर्वर्जानि षट्कर्म्माणि उदीरयन्ति अप्रमत्तापूर्वानिवृत्तिसूक्ष्माश्चत्वारः । अद्धावलिकाशेषे तु मोहे सूक्ष्मस्तद्वर्जानि पञ्चैवोदीरयन्ति यतस्तच्छेषस्य मोहस्योदीरणा नास्ति ।।३३।।

वेयणियाउयमोहे वज्ज उईरंति पंचेव ।
अद्धावलिया सेसे नामं गोयं च अकसायी ॥ ३४ ॥

वेदनी [य] आयुर्मोहवर्जानि पञ्च । द्वौ उपशान्तक्षीणावुदीरयतः । किं सदा, नेत्याह, अद्धावलिकाप्रविष्टे ज्ञानदर्शनावरणांतरायकर्म्मणीति शेषः । नामगोत्रे द्वे एव उदीरयति । '[अ]कषायी' क्षीणमोहः, अयं ज्ञानदर्शनावरणांतरायाणि क्षपयन् तावदुदीरयति यावत्केवलोत्पत्त्या सत्तावावलिकाशेषाणि भवन्ति तत ऊर्ध्वमनुदीरयन्नेव क्षपयति । तदा नामगोत्रयोरेवोदीरणा । उपशान्तस्तु सदा पञ्चैव । क्षपया[णा]भावेनावलिकाप्रवेशाभावात ।।३४।।

उईरेइ नामगोए छकम्मविवज्जिया सजोगी उ ।
वट्टंतो उ अजोगी न किंचि कम्मं उईरेसि ॥ ३५ ॥

सयोगी तु षट्कर्माणि वर्जयित्वा नामगोत्रे एवोदीरयति । घातिचतुष्कं क्षीणम्, वेद[नी]यायुषोस्तूदीरणा प्रागेवोपरता [तद्योग्या]ध्यवसायाभावात् । अयोगी तु वर्तमानोऽपि कर्मचतुष्टये न किंचित्कर्मोदीरयति, योगसव्यपेक्षत्वादुदीरणाया ।।३५।।

इयतीर्बध्नन्नियतीर्वेदयत्युदीरयति चेति संयोगगतं पश्चानुपूर्व्याह--

अणुईरं उ अयोगी अणुहवइ चउव्विहं गुणविसालो ।
इरियावह न बंधइ आसन्नपुरक्ख[क्ख]डो संतो ॥ ३६ ॥

अयोगी गुणैर्ज्ञानादिभिर्विशालोऽनुदीरयन्नेवाघातिचतुष्क'मनुभवति' वेदयति । ईर्या-योगव्यापारः सैव जीवगृहप्रवेशे पन्था यस्य तदीर्यापथं-सातम् तदुपशान्तादिभिर्बद्धम्, अयं तु न बध्नाति योगाभावात् । सन् मोक्षस्तत्त्वतः स एव चतुर्गत्यपेक्षया सन्निधमान, स आसन्नपुरस्कृतो येन स आसन्नपुरस्कृतः सन् । 'उ' अला(प)क्षणिक ।।३६।

इरियावहमाउत्तो चत्तारि व सत्त चेव वेयंति ।
उईरंति दुन्नि पंचय संसा [र] गयम्मि भयणिज्जो ॥ ३७ ॥

'म'अलक्षणः। ईर्यापथायुक्ता सातयुक्ता उपशान्तक्षीणसयोगाः सातं बध्नन्तश्चत्वारि सप्त वेदयन्ति। तत्र सयोग्यघातिचतुष्कम्। अमोहे[हो]दयौ सप्त। उदीरयन्ति तु द्वे पञ्च वा, तत्र[स]योगी नामगोत्रे। क्षीणस्तु ज्ञानदर्शनान्तरायेष्वावलिकाऽप्रविष्टेषु पञ्च; अन्यथा तु द्वे। उपशान्तस्तु सदा पञ्चैव। संसारगते विषये उपशान्तो भजनीयः कस्याप्यस्ति कस्यापि नास्ति। क्षीणसयोगिनो नास्त्येव संसारः॥३७॥

छप्पंच उईरंतो बंधइ सो छव्विहं तणुकसाओ।
अट्ठविहमणुहवन्तो सुक्कज्झाणे दहइ कम्मं ॥ ३८ ॥

तनुकषायः सूक्ष्मः पूर्वयुक्त्या षड्विधं पञ्चधा च उदीरयन्नष्टधा चानुभवन् षड्विधमुक्तस्वरूपं बध्नाति। स तस्यामवस्थायां शुक्लध्यानेनानंतगुणं कर्म्म दहति, श्रेणिस्थितस्य जन्तो धर्मशुक्लध्यानद्वयं लघुचूर्ण्यभिप्रायेणाविरुद्धम्। बृहच्चूर्णौ तु धर्मध्यानमेवास्य, उक्तञ्च-'वीतरागस्वस्यासन्नत्वेनोपचारात्' ॥३८॥

अट्ठविहं वेयंता छव्विहमुईरंति सत्त बंधंति।
अनियट्टी य नियट्टी अपमत्तजई य ते तिन्नि ॥ ३९ ॥

अनिवृत्तिनिवृत्यप्रमत्ता अष्टधा वेदयन्त आयुर्वेदनीयवर्जं षड्विधमुदीरयन्ति। आयुर्वर्जानि सप्त बध्नन्ति, नन्वप्रमत्तस्यायुर्बन्धोऽस्तीत्याह-प्रमत्तेनारब्धमायुर्बन्धमप्रमत्तः समर्थयतो सतोप्यविवक्षा वा। च शब्दात्सोऽप्युक्तो वा ॥३९॥

अवसेसट्ठविहकरा वेइंति उईरगाय अट्ठण्हं।
सत्तविहगावि वेइंति अट्ठगमुईरणे भज्जा ॥ ४० ॥

अवशेषा मिथ्यादृष्टयादिप्रमत्तान्ता 'अष्टविधकरा' अष्टविधबन्धकाः सन्तो वेदका उदीरकाश्चाष्टानां, सप्तधोदीरणा वेद्यमानायुष आवलिका प्रवेशाकाल एव प्रागुक्ता सा चाष्टधाबधु[बन्धका]नां न भवति। आयुर्बन्धस्त्रिभागादिष्वेव भवति, त(दो)दोदीरणाऽतोऽष्टधैवेति युक्तम्। त एव संयोगचिन्तायाः प्रत्येकचिन्तातो विशेषः। यतः प्रत्येकचिन्तायां सप्ता-ऽष्टधा बन्धः सप्ताष्टधोदीरणा चामीषां सामान्येनोक्ता। अत्र तु अष्टधा बध्नतामष्टधैवोदीरणेति। सप्तधा बन्धका अपि वेदयन्त्यष्टधैव। उदीरणायां तु भाज्याः, सप्तधा अष्टधा वा भवति आयुष आवलिकाप्रवेशकाले आयुस्त्यक्त्वा इन्य[अन्यत्र]त्वष्टधा मिश्रस्तु सदा सप्तधा बध्नाति अष्टधा वेदयत्युदीरयति चायुर्बन्धाभावात् ॥४०॥

चत्वार्य[रोऽ]नुयोगाः-प्रकृतिवर्णना, साद्यादिप्ररूपणा, भूयःकारादिप्र० स्वामित्वप्र० तत्र प्रकृतयो मूलोत्तरा आह--

णाणस्स य दंसणस्स य, आवरणं वेयणीयमोहणीयं।
आउय नामं गोयं, तहंतरायं च पयडीओ ॥ ४१ ॥
पंच-नव दुन्नि अट्ठावीसा चउरो तहेव बायाला।
दुन्नि य पंच य भणिया, पयडीओ उत्तरा चेव ॥ ४२ ॥

अनयोः स्वरूपमस्मत्कृतकर्मस्तव-कर्मविपाकटिप्पनयोर्ज्ञेयम्। लेशेत उच्यते-ज्ञानं मत्यादिपञ्चधा, दर्शनं चक्षुरादि नवधा, तयोरावरणे ज्ञानावरणं १, दर्शनावरणं २। सातासातरूपेण वेदन

इति वेदनीयं । ३ । मुह्यन्ति सत्कृतेभ्यो जीवा अनेनेति मोहनीयं । दर्शनमोहनीयं मिथ्यात्वमिश्र-सम्यक्त्वरूपम् । चारित्रमोहनीयं षोडशकषाया नवनोकषायाः ।४। आयाति भवान्तरे संक्रामता-मुदयमित्यायुर्नरायुष्कादि चतुर्धा ।५। नमयति जन्तुं गत्यादिपर्यायैरिति नाम । सुरोऽयमित्यादिनाम यद्वशाज्जन्तुरासादयति तत्कर्माप्युपचारान्नाम । द्विचत्वारिंशद्विधम्, तत्र गति ४-जाति ५-तनु ५-उपांग ३-बन्धन ४-सङ्घात ५-संहनन ६-संस्थान ६वर्ण ५-गन्ध २-रस ५-स्पर्श ८-आनुपूर्वी ४-विहा-योगति २ एवं १४ पिण्डप्रकृतयः प्रत्येक २८ मिलिताः ४२ पिण्डभेदे. ६५ सह ९३ । बन्धननाम यदा पञ्चदशधा विवक्ष्यते-यथा औदारिकौदारिकबन्धननाम ।१। औदारिकतैजसबं० ।२। औदारिककार्मण बं० ।३। औदारिकतैजसकार्मणबं० ।४। एवं वैक्रियाहारकयोरपि चत्वारि चत्वारि तत्तदभिलापेन १२ । तथा तैजस तैजस बं० ।१। तैजसकार्मण बं० ।२। कार्मणकार्मण बं० ।३। एवं १५ । तदा त्र्युत्तरं शतं नाम्नः ।६। गूयते शब्द्यते प्रधानाऽप्रधानतया तेन उच्चैर्नीचैर्गोत्रं कर्माप्युप[चा] राद्द्विधा ।७। जीवं वा अर्थ-साधनं चान्तरा(य)पततीत्यन्तराय । जीवस्य दानादिकमर्थसिसाधयिषोर्विघ्नीभूय अन्तरा पतति पञ्चधा ॥ ४१-४२ ॥ साद्यादिर्मूलप्रकृतिष्वाह—

साइअणाई धुवअद्धुवो य बन्धो उ कम्म छक्कस्स ।
तइए साइगसेसा अणाइधुवसेसओ आऊ ॥ ४३ ॥

यः पूर्वं छिन्नः पुनर्भवति स बन्धः सादि । यस्त्वनादि कालसन्तानेन प्रवृत्तो न कदाचिच्छिन्नः सोऽनादिः । अभव्यसम्बन्धो ध्रुवः । भव्यानामध्रुव । तत्र ज्ञानदर्शनावरणमोहनामगोत्रान्तरायकर्म-षट्कस्य साद्यादिश्चतुर्धापि बन्धो लभ्यते, कथ ? मोहवजकर्मपञ्चकस्य मिथ्यादृष्टयादिसूक्ष्मान्ताः सर्वेऽपि बन्धकाः । उपशान्तस्तस्याऽबन्धक । मोहस्य त्वनिवृत्तिमेव यावद् बन्धनः [क] । ततः सूक्ष्मापशान्तौ एतद् कर्मषट्कस्याऽबन्धको भूत्वा आयुःक्षये स्थितिक्षये वा प्रतिपत्य यदा पुनरेतानि बध्नतस्तदैतद् बन्धः स्यादिति । सूक्ष्मोपशान्तावस्थामप्राप्तानामनादिः । ध्रुवोऽभव्याना [म्] ध्रुवो भव्यानाम् । 'तइए' त्ति तृतीये वेदनीये सादिकाच्छेदोऽन्यो[ऽना]दिध्रुवाध्रुवरूपस्त्रिधा । वेदनीयस्य बन्धाभावोऽयोगिन्येव तस्य च प्रतिपातो नास्त्यतो न सादित्वम्, आसंसारं बध्यमानत्वादनादिस्त्वस्ति । भव्याभव्यापेक्षयाऽध्रुवाध्रुवौस्तः । अनादिध्रुवशेषस्त्वायुषि साद्यध्रुवरूपः । यत आयुषस्त्रिभागादावे-व नियतो बन्धस्ततोऽनादिर्ध्रुवश्च [न] ॥ ४३ ॥ उत्तरप्रकृतीनामाह--

उत्तरपयडीसु तहा धुवियाणं(धुवियाण)बन्धचउविगप्पो उ ।
साइगअद्धुवियाओ सेसा परियत्तमाणाओ ॥ ४४ ॥

उत्तरप्रकृतीषु यथा मूलप्रकृतिषु प्रोक्त साद्यापि[दि] स्तथोच्यते-तत्र ध्रुवबन्धिनीनाम् चतुर्विकल्पोऽपि बन्धः । स्वबन्धोच्छेदादर्वाग् याः सदा बध्यन्ते न कदाचित् परावर्तन्ते ता(ध्)ध्रुव-बन्धिन्यः सप्तचत्वारिंशत् यथा-ज्ञानाव० ५, दर्शना व० ९. मिथ्यात्वं षोडशकषाया भयं जुगुप्सा १९, तजसकार्मणवर्णगन्धरस-स्पर्श-अगुरुलघु-उपघात-निर्माण ९, अन्तराय० ५=४७ । तत्र ज्ञानाव० ५-दर्शना० चतुष्कान्तरायाणां १४ सूक्ष्मान्त्यसमये छिन्नबन्धानां उपशान्तोऽबन्धको भूत्वा पतितो यदैता बध्नाति तदा सादिः । उपशान्तमप्राप्तानामनादिः । ध्रुवाध्रुवौ (१०) प्राग्वत् । संज्व-लनानां ४मनिवृत्तौ बन्धोच्छेदं कृत्वा पतितस्य बध्नतः सादिः । शेष प्राग्वत् । निद्राप्रचलातैजस-कार्मणवर्णादि ४ अगुरुलघूपघातनिर्माणभयजुगुप्सानां १३ निवृत्तौ छेदं कृत्वा पतितस्य बध्नतः सादिः शेषं प्राग्वत् । प्रत्याख्यानानां ४ देशविरते छेदं कृत्वा पतित्वा बध्नतः सादि । शेषं प्राग्वत् ।

अप्रत्याख्यानानां४मविरते छेदस्ततो देशे गत्वा पतितस्य बध्नतः सादिः शेषं प्राग्वत् । स्त्यानर्द्धित्रिक-मिथ्यात्वानन्तानुबन्धीनां ८ मिथ्यादृष्टिः सम्यक्त्वं प्राप्याऽबन्धको भूत्वा पतितबन्धन [पतित्वा बध्नतः] सादिः । शेषं प्राग्वत् । 'साइग' त्ति सादिका अध्रुवाश्च भवन्ति ध्रुवबन्धिनीभ्यःशेषाः परावर्त-मानाः । परावृत्य परावृत्य पुनर्बध्यन्ते यास्ता अध्रुवबन्धीन्यस्त्रिसप्ततिर्यथा—सातासाते वेदत्रयं, हास्यरतियुग्ममरतिशोकयुग्मम्, चत्वार्यायूंषि, चतस्रो गतयः, पञ्च जातयः, औदारिकवैक्रियाहारक-शरीराणि,षट्संस्थानानि, त्रिण्यङ्गोपाङ्गानि, षट्संहनना न, चतस्र आनुपूर्व्यः, पराघातं, उच्छ्वासं, आतपं, उद्योतं, विहायोगतिद्वयम्, त्रसादिविंशतिः, तीर्थकरं उच्चैर्नीचैर्गोत्रे ७३ एतन्मध्ये साता-साते वेदत्रयं च परस्परविरुद्धत्वान् न युगपद् बध्यन्त इति परावर्तमानाः । पराघातोच्छ्वासनाम्नी तु पर्याप्तकनाम्नैव सह बध्येते नाऽपर्याप्तकनाम्नेति परावर्तमानता । आतपं त्वेकेन्द्रिययोग्यबन्धेनैव सह बध्यते, उद्योतं तिर्यग्गतिसहितमेवेति तयोः परावृत्तिः । तीर्थकराहारके तु यथाक्रम सम्यक्त्वसंयम-गुणवन्त एव बध्नन्तीति परावृत्तिः । एवं सर्वा अप्येता नियतकाल एव बध्यन्तेऽतः सादिकाः, जातोऽपि बन्धो निवर्तत इत्यध्रुवा । मूलप्रकृतिबन्धेषु भूयस्काराल्पतरावस्थितानाह—

चत्तारि पयडिठाणाणि तिण्णि भूयगारअप्पतरगाणि ।

मूलपयडीसु एवं अवट्ठिओ चउसु नायव्वो ॥ ४५ ॥

तत्रैकधाऽल्पबन्धको भूत्वा पुनः षड्विधादि बहुबन्धको भवति स आद्यसमये भूयस्कारबन्धः १ यत्र त्वष्टधातः सप्तधादिबन्धको भवति सोऽल्पतरः २ यत्र त्वाद्यसमये एकधा द्वितीयेऽप्येकधा सोऽ-वस्थितः ३ यत्र त्वबन्धको भूत्वा पुनर्बध्नाति सोऽ वक्तव्यः ४ अयन्तूत्तरप्रकृतीनामेव, मूलप्रकृतीनां सर्वथाऽबन्धकस्याऽयोगिनः प्रतिपाताभावात् । एवं चतुर्धा बन्धः । उक्त च—

एगादहिगे पढमो एगाई ऊणगम्मि बीओ य ।

तत्तियमित्तो तइयो पढमे समये अवत्तव्वो ॥ ४६ ॥ प्रक्षेपः

तत्र मूलप्रकृतिबन्धस्थानानि चत्वारि 'सत्तट्ठछ एग बन्धा' इति तत्र त्रयो भूयस्कारास्त्रयो-ऽल्पतराः । यथा आयुर्बन्धकालेऽष्टबन्धस्ततः सप्तधा बध्नत प्रथमसमयेऽल्पतरः १ द्वितीयादि-समयेष्ववस्थितः ।१ सप्तधातः सूक्ष्मे षट्धा बध्नतोऽल्पतरः ।२। द्वितीयादिष्ववस्थितः ।२। षड्विधादुप-शान्ते एकधा बध्नतोऽल्पतर. द्वितीयेऽवस्थितः ३ इति त्रयः । उपशान्ते एकधा बन्धात् सूक्ष्मे षड्विधं बध्नतो भूयस्कार. ।१। एवं द्वितीयादिष्ववस्थितः सर्वत्र । ततोप्यध. सप्तधा बध्नतो भूयः ।२। आयु-र्बन्धेऽष्टधा बध्नतो भूय. ३ एवं त्रयः ॥४५-४६॥ । उत्तरास्वाह—

तिण्णिदसअट्ठठाणाणि दंसणावरणमोहनामाणं ।

एत्थ व भूयोगारो सेसेसेगं हवइ ठाणं ॥ ४७ ॥

दर्शनावरणोत्तरप्रकृतीनां त्रीणि बन्धस्थानानि, मोहस्य दश, नाम्नोऽष्टौ यथासंख्यं त्रिषु कर्मसु 'भूयक्कारे' इत्यादि लोपात् चत्वारोऽपि बन्धा भवन्ति । कथं ? दर्शननवकं सासादनं यावत् बध्यते ततः परं स्त्यानर्द्धित्रिकस्य बन्धश्छिद्यते, [त] तो मिश्रादिषु षड्विधं बध्नतोऽल्पतरः ।१। ततो निवृत्तौ निद्राद्विकछेदस्तत्राऽल्पतरः ।२। शेष[ाः]सूक्ष्मं यावत् बध्यते । ततः प्रतिपत्य षड्विधं बध्नतो भूयस्कारः । ततोऽपि नवधा बध्नतो भूयःकारः ।२। यदा तूपशान्ते दर्शननवकाबन्धको भूत्वा अद्धाक्षये पुनश्चतुर्धा बध्नाति तदाऽवक्तव्यः । १ भूयस्कारादिलक्षणायोगान्न तद्विकल्पे वक्तुं शक्यत इति

अवक्तव्यः, यदा तूपशान्त एवायुःक्षयादनुत्तरेषूत्पद्यते तदाद्यसमये षड्विधबन्धतोऽवक्तव्यः । २ तदेवं द्वौ भूयसो, द्वौऽल्पौ द्वौऽवक्तव्यौ । मोहबन्धस्थानान्येवं दश-२२-२१-१७-१३-९-५-४-३-२-१ तत्र मिथ्यात्वं षोडशकषायाः १७,अन्यतरो वेदः १८, हास्यरतियुगअरतिशोकयुगयोरन्यतरद्युग २०, भयं २१, जुगुप्सा २२, एतां मिथ्यादृष्टिरेव बध्नाति । एषैव मिथ्यात्वरहिता २१, परं स्त्रीपुंवेदयोरन्यतरो वेदः, एतां सासादनो बध्नाति । अनन्तवर्जकषायाः १२, पुंवेद १३, अ यतरद्युगं १५, भयं १६, जुगुप्सा १७, एतद् बन्धो मिश्राविरतयोरेव । अप्रत्याख्यानवर्जाः एताः १३ देशविरतो बध्नाति । प्रत्याख्यान ४ वर्जा नव प्रमत्तो बध्नाति । अप्रमत्तनिवृत्ती च एता एव परं हास्यरतियुग्मेव । संज्वलनचतुष्कं पुंवेदः पञ्च अनिवृत्तिर्बध्नाति, पुंवेदे छिन्ने चतुष्कमयमेव क्रोधे छिन्ने त्रयं, माने द्वयं, मायायाम् एकं लोभं । एषु दशसु नव भूयस्काराः एकधा निपत्य द्विधा बध्नत आद्य एवं त्रिधादिषु यावद् द्वाविंशे नव अल्पतरा स्त्वष्टौ । तत्र द्वाविंशतिधा सप्तदशधा बध्नत आद्य, । एवं यावदेकेऽष्टौ । द्वाविंशादेकविंशे न गतिरसंभवात्, यतो न मिथ्यादृष्टिरनन्तरभावेन सासादनत्वं याति किन्तूपशमिक एव । अवक्तव्यौ द्वौ । यदा उपशान्तो मोहस्याबन्धकोभूत्वाऽद्धाक्षये प्रतिपत्य संज्वलन लोभं बध्नाति तदेक । अथोपशान्त एवायुः क्षयेऽनुत्तरेषूत्पद्यते तदा सप्तादशधा बध्नतः २ ॥४७॥

तेवीसपण्णवीसाछव्वीसाअट्ठवीसइगुनीसा।
तीसेगतीस एगं बन्धट्ठाणाइ नामस्स ॥ ४८ ॥ प्रक्षेप०

नाम्नोऽष्टौ २३-२५-२६-२८-२९-३०-३१-१ । तत्र 'तैजसं' बध्यमानत्वात्. [तैजसादि ९ ध्रुवाः] तथा तिर्यग्गतिस्तिर्यगानुपूर्वी, एकेन्द्रियजातिरौदारिकं, हुंडं स्थावरं, बादरसूक्ष्मयोरन्यतरत्, अपर्याप्तं प्रत्येकसाधारणयोरन्यतरत् अस्थिरं, अशुभं, दुर्भगं, अनादेयं, अयशःकीर्तिरेताश्चतुर्दशपूर्वाभिः सह त्रयोविंशतिः । एतां चैक-द्वि-त्रि-चतुः पञ्चेन्द्रियाणामन्यतरो मिथ्यादृगेवाऽपर्याप्तैकेन्द्रिययोग्यां बध्नाति । एषा पराघातोच्छ्वासाभ्यां सह २५ । परमपर्याप्तस्थाने पर्याप्तम्,स्थिरास्थिरशुभाशुभ-यशः-कीर्त्ययश.कोर्तीनां परावृत्तिर्वाच्या । एतां पर्याप्तैकेन्द्रिययोग्यां नानाजोवा बध्नन्ति । एषा विकलेन्द्रियादियोग्यापि नानाभङ्गैः संभवति परं परस्थानत्वान्नोच्यते सप्ततीकातो ज्ञेया । एषैवातपोद्योतयोरेकतरक्षेपे २६, एषा पर्याप्तैकेन्द्रिययोग्यैव बध्यते, तथा देवगतिर्देवानुपूर्वी पञ्चेन्द्रियजातिर्वैक्रियद्विकं समचतुरस्रं उच्छ्वासं पराघातं, प्रशस्तविहायोगतिस्त्रसं बादरं, पर्याप्तं प्रत्येकं स्थिरास्थिरयोः शुभाशुभयोर्यशःकीर्त्ययश.कीर्त्योः पृथगेकैकमन्यतरत्, सुभगं, सुस्वरं, आदेयमेताः १९ पूर्वनवध्रुवाभिः सह २८ । एतां देवगतियोग्यां विशुद्धास्तिर्यग्मनुष्या बध्नन्ति । अस्यां तीर्थकरनाम्नि क्षिप्ते २९ एतां सम्यक्दृशो नरा एव बद्धतीर्थंकरनामानो देवगतियोग्यां बध्नन्ति । यद्वा या पूर्वं पञ्चविंशतिरुक्ता तन्मध्ये औदारिकाङ्गोपाङ्गाऽन्यतरस्वरेऽन्यतरसंहननेऽन्यतर विहायोगतौ क्षिप्तायां २९ परमेकेन्द्रियस्थाने-पञ्चेन्द्रियं स्थावरस्थाने त्रसं वाच्यं । एषा पर्याप्तपञ्चेन्द्रियतिर्यग्योग्यैव । पूर्वोक्ताष्टाविंशतौ आहारकद्विकक्षेपे ३०, परं स्थिर-शुभ-यशकीर्तय एव वाच्या न विपक्ष । अस्यास्त्वप्रमत्तनिवृत्ती बन्धको यद्वा कश्चिद् बद्धतीर्थंकरनामकर्मा देवो मृत्वा नृगतियोग्यामेव बध्नाति । यथा-नृद्विकं, पञ्चेन्द्रियं-औदारिकद्विकं, तुल्यं[समचतुरस्रं], वज्रर्षभनाराचं, पराघातं, उच्छ्वासं, प्रशस्तविहायोगतिस्त्रसादिचतुष्कं, स्थिरास्थिरयोः शुभाशुभयोः यशःकीर्त्ययशकीर्त्योः पृथगेकैकं, सुभगं सुस्वरं, आदेयं, तीर्थकरं २१, नवध्रुवाभिः सह ३० । आहारकद्विकयुक्ताया पूर्वं त्रिंशदुक्ता, तस्यां तीर्थकरे क्षिप्ते ३१ । एतामप्रमत्त कियंतमपि भागं यावन्निवृत्तिश्च देवगतियोग्यामेव बध्नाति । एकधा तु यशःकीर्तिरूप निवृत्य नवृत्ति-

सूक्ष्माः स्वरूपेणैव बध्नन्ति। न तु कस्यचिद्योग्यं देवगतियोग्यस्यापि बन्धस्य छिन्नत्वात्। एवं भूयस्काराः षट्। तत्र त्रयोविंशतिं बद्ध्वा विशुद्धितः पञ्चविंशतिं बध्नत आद्यः। एवं षड्विंशत्यादिष्वेकत्रिंशति षष्ठः। यद्वा एकधा बद्ध्वा श्रेणेःनिपततः पुनःनिवृत्तावेकत्रिंशतं बध्नतः षष्ठो न सप्तमः। एकत्रिंशत्स्थानस्योभयथाप्येकत्वात्। अल्पतराः सप्त। तत्र निवृत्तौ देवयोग्या २८-२९-३०-३१ वा बद्ध्वा एकविधं गतस्याद्यः। एकत्रिंशतस्त्रिंशतं गतस्य द्वितीयः। कथं ? एकत्रिंशद्बन्धक देवस्य [देवगतस्य] नरयोग्यां त्रिंशतं बध्नतः। स एव यदा नरेषूत्पन्नो देवयोग्यां तीर्थंकरयुतां एकोनत्रिंशतं बध्नाति तदा ३। तस्मादष्टाविंशतौ ४ षड्विंशतौ ५ पञ्चविंशतौ ६ त्रयोविंशतौ ७।

अवक्तव्यास्त्रयः। उपशान्ते नाम्नोऽबन्धको भूत्वा अद्धाक्षये प्रतिपत्य यदा एकधा बध्नाति तदाद्यः, उपशान्तात्तस्यैवायुः क्षयेणात्ततीर्थंकरनाम्नोऽनुत्तरेषूत्पन्नस्याद्यसमये नृयोग्यां तीर्थंकरयुतां त्रिंशतं बध्नतः २। तत्रैव तीर्थंकरवियुक्तां नृयोग्यां एकोनत्रिंशतं बध्नतः ३। वेदनीय(द्विक)स्यत्ववस्थित बन्ध एव, अवक्तव्यो न संभवति, उक्तं च—

नाणावरण तह आउयम्मि गोयम्मि अंतरायम्मि। ठिय अव्वगत्तबन्धा ....॥

यतः आयुषो निवृत्तौ शेषाणामुपशान्तोऽबन्धको भूत्वा पुनर्बन्धेऽवक्तव्यः। द्वि० स० अवस्थितः। .... अवट्ठिओ वेयणिम्मि ॥

बन्धस्वामित्वमाह—

सव्वासिं पयडीणं मिच्छद्दिट्ठी उ बन्धओ भणिओ।
तित्थयराहारदुगं मुत्तुं सतरुत्तरसयस्स ॥ ४९ ॥

बन्धे विंशत्युत्तरं शतं तासां सर्वासां प्रकृतीनां मिथ्यादृष्टिर्बन्धक उक्तस्तीर्थंकरनामाहारकद्विकं मुक्त्वा शेषसप्तदशोत्तरशतस्य, यतः—

सम्मत्तगुणनिमित्तं तित्थयरं संजमेण आहारं।
बज्झन्ति सेसियाओ मिच्छत्ताईहिं हेऊहिं ॥ ५० ॥

सम्यक्त्वगुणाद्धेतोस्तस्यादयो विंशतिः तद्धेतुक तीर्थंकरनाम। संयमेनाप्रमत्तेनाहारकद्विकं बध्यते। शेषाः ११७ मिथ्यात्वादिभिः हेतुभिर्बध्यन्ते। काः कुत्र छिन्ना इत्याह–

सोलस मिच्छन्तंता पणुवीसं हुंति सासणंताओ।
तित्थयराउदुसेसा अविरइयंता उ मीसस्स ॥ ५१ ॥

मिथ्यात्वं, नपुंसकं, नारकायुर्नरकद्विकं एक द्वि-त्रि-चतुरिन्द्रियजातयः, हुंडं, सेवार्त्तं, आतपं, स्थावरं, सूक्ष्मं, अपर्याप्तं, साधारणं १६। आसां मिथ्यात्वेऽस्तस्त [त्र]भावस्तदुत्तरत्राभाव एव रूपः। नारकैकविकलेन्द्रिययोग्या अशुभाः एतद्वर्जं एकोत्तरशतं सासादनो बध्नाति। स्त्यानर्द्धित्रिकं चत्वा[रो]ऽनन्तानुबन्धिनः स्त्रीवेदस्तिर्यगायुस्तिर्यग्द्विकं आद्यन्तवर्जानि पृथक् चत्वारि चत्वारि संस्थानसंहननानि उद्योतं अशुभखगतिर्दुर्भगं दुस्वरं अनादेयं नीचैर्गोत्रं २५ एताः सासादनान्ताः। एतच्छेषां तीर्थंकरनामसहितामविरतो बध्नाति सप्तसप्ततिं। 'तित्थयराउ' त्ति तीर्थंकरनृदेवायुर्द्विकशेषा अविरतान्ताः सप्ततिः या एवाविरतो बध्नाति ता एव मिश्रे परं चतुःसप्ततिः। नारकतिर्यगायुषी यथासंख्यं मिथ्यादृष्टिसासादनयोश्छिन्ने।

अविरइयंताओ दस विरयाविरयंतियाउ चत्तारि ।
छच्चेव पमत्तंता एगा पुण अप्पमत्तंता ॥ ५२ ॥

अप्रत्याख्यानाः ४ मनुष्यायुर्मनुष्यद्विकं ७ औदारिकं द्विकं वज्रर्षभनाराचं १० एता अविरतान्ताः । ननु सम्यग्दृष्टिस्त्वादसौ देवयोग्यामेव बध्नाति, कुतो नरायुष्कसंभव इत्याह–नरतिर्यक्षुस्थितोऽसौ देवयोग्यं बध्नाति । नारकदेवेषु तु स्थितो नरयोग्यमेव । देशविरतादयस्तु न नरकस्वर्गयोरिव्यासामुत्तरत्रासंभवः । सप्तसप्ततेर्दशस्वपगतासु देशविरते ६७ बन्धः । प्रत्याख्यानाः ४ देशे छिन्नाः प्रमत्ते ६३ बन्धः । असातं अरतिः शोकः अस्थिरं अशुभं अयशःकीर्ति. ६ एताः प्रमत्ते छिन्नाः । षट्कापगमेऽप्रमत्ते ५७ आहारकद्विकक्षेपे ५९ बन्धः । प्रमत्तेनारब्ध (द्वय)मसौ समर्थयते देवायुष्कं, [तच्]चासौ स्वाद्धाया (अ) संख्येयभागे छिनत्ति ततः ५८ बन्धः । निवृत्तेरपि ।

दो तीसा चत्तारि य भागे भागेसु संखसन्नाए ।
चरिमे य जहासंखं अपुव्वकरणंतिया होन्ति ॥ ५३ ॥

द्वौ त्रिंशत् चत्वारि च छिन्नाः क्व ? भागेऽपूर्वकरणस्य भागे कस्य भागस्यापि कियत्सु संख्येयसंज्ञया । चरमे च भागे यथासंख्यं निवृत्यन्तो भवति । तत्रायमष्टपञ्चाशत् तावद् बध्नाति यावत् संख्येयभागस्तत्र निद्राप्रचलयोः छेदः ततः ५६ बध्नाति । तावद् यावद् संख्येय भागः । तत्र देवद्विकं पञ्चेन्द्रियजातिर्वैक्रियद्विकमाहारकद्विकं तैजसं कार्मणं तुल्यं वर्णादि ४ अगुरुलघु उपघातं पराघातं उच्छ्वासं सुभखगतिः त्रसादि ४ स्थिरं शुभ सुभगं सुस्वरं आदेयं निर्माणं तीर्थकरं ३०। एतच्छेदे २६ ता बध्नाति यावच्चरमसमयस्तत्र हास्यरतिभयजुगुप्सानां ४ छेदः । ततोऽनिवृत्तौ २२ बन्धः ।

संखेज्जइमे सेसे आढत्ता बायरस्स चरमंते ।
पंचसु एक्केक्कंता सुहुमंता सोलस हवन्ति ॥ ५४ ॥

षड्विंशतिमनिवृत्तिस्तावत् बध्नाति यावत् स्वाद्धायाः संख्येयभागा गता एकस्तु संख्येयभागः शेषस्तस्य पञ्चसु भागेस्वेकैकस्याः छेदः । तत्र प्रथमभागान्ते नुवेदः, २१ बन्धः । द्वितीये क्रोधं २० बन्धः । तृ० मानं १९ ब० । च० मायां १८, लोभं १७. एताः सूक्ष्मस्तावद् बध्नाति यावच्चरमसमयस्तत्र ज्ञानाव० ५, दर्शन० ४, यशःकीर्तिरुच्चैर्गोत्रं अन्तराय ५–१६ आसां छेदः, तदपगमे सातमेकं उपशान्त-क्षीण-सयोगिनो बध्नन्ति ।

सायंतो जोगंते एत्तो परओ उ नत्थि बन्धोत्ति ।
नायव्वो पयडीणं बंधस्संतो अ[अणं]तो य ॥ ५५ ॥

सातस्यान्तश्छेदः सयोग्यन्ते तत परं नास्ति बन्धः । ज्ञातव्यः प्रकृतीनां बन्धस्यान्तस्तत्रभावो-(ऽनन्तश्च) तदुत्तरत्राभाव इति । भव्यानां सान्तोऽभव्यानामनन्त इति वा । स्वामित्वं मार्गणास्थानेष्वाह–

गइआइएसु एवं तप्पाउग्गाणमोहसिद्धाणं ।
सामित्तं नेयव्वं पयडीणं ठाणमासज्ज ॥ ५६ ॥

एवमुक्तरित्या प्रकृतीनां स्थानं ज्ञानपञ्चकादिमाश्रित्य बन्धस्वामित्वं ज्ञेयं । 'केसु गइइन्दिय त्ति बारेसु' तत् गत्यादिप्रायोग्याणां प्रकृतीनां, किं भूतानामोघसिद्धानां सामान्यानन्तरभणननिश्चितानां, कोऽर्थः ? ओघेन यदुक्तं स्वामित्वं गत्यादिष्वपि तथा ऊह्यं । तत्र नारकदेवायुषी नरकद्विकं देवद्विक एक-द्वि-त्रि-चतुर्जातयो वैक्रियद्विकमाहारकद्विकमातपं स्थावरं सूक्ष्ममपर्याप्तं साधारणं १९ एता

भवप्रत्ययादेव नारकाणां न भवन्ति। शेषमेकोत्तरशतं बध्नन्ति। तिर्यग्गतौ आहारकद्विकं तीर्थकरं ३ मुक्त्वा ११७ बन्धो। नराणां १२० बन्धे परं तिर्यञ्चो नराश्च मिथ्यात्वविरतासु देवगतियोग्यमेव बध्नन्ति, न नृगतियोग्यं। देवास्तु नरकगतियोग्यं यदुक्तं एकोत्तरशतं तदेवैकेन्द्रियआतपस्थावरसहितं १०४ बध्नन्ति। 'इन्दिये' त्ति एक-द्वि-त्रि-चतुरिन्द्रिया नारकदेवायुषी नरकद्विकं देवद्विकं वैक्रियद्विकं आहारकद्विकं तीर्थकरं ११ मुक्त्वा पृथक् पृथक् नवोत्तरशतं बध्नन्ति। पञ्चेन्द्रिया १२०। एवं कायादिष्वपि बन्धस्वामित्वविचयानुसारतो वाच्यं। प्रकृतिबन्धो गतः।

स्थितिबन्धमाह-तत्र पञ्चानुयोगाः स्थितिप्ररूपणा।१। साद्यादिप्र०।२। प्रत्ययप्र०।३। शुभाशुभप्र०।४। स्वामित्वप्र०।५।

सत्तरिकोडाकोडी अयराणं होइ मोहणीयस्स।
तीसं आइतिगंते वीसं नामे य गोए य ॥५७॥
तेत्तीसुदही आउम्मि केवला होइ एवमुक्कोसा।
मूलपयडीण एत्तो ठिइं जहन्नं निसामेह ॥५८॥

महत्त्वात्तरीतुं न शक्यन्तेऽतराणि सागराणि तेषां सप्ततिः कोटाकोटयो मोहस्योत्कृष्टस्थितिः। अत्र सप्तवर्षसहस्राण्यनुदयरूपाऽबाधा तया ऊना (म) कर्मस्थितिनिषेकः। निषेको नाम प्रथमसमये बहुः द्वितीये हीनः एवं हीनतरस्तमः अबाधां विहाय तत ऊर्ध्वं वेदनार्थं कर्मनिषेको भवति। स्थापना ⁘

'तीसं' ति आदित्रिकं ज्ञानदर्शनावरणे वेदनीयरूपं तथान्त्यमन्तरायं तेषु त्रिंशत्सागर० कोटा[को]ट्यः। त्रीणि वर्षसहस्राण्यबाधा। नामगोत्रयोर्विंशतिसाग०। वर्षसहस्रद्वयमबाधा। आयुषि पूर्वकोटि त्रिभागाधिकानि ३३ सागराण्युत्कृष्टा स्थितिः। पूर्वकोटीत्रिभागोऽबाधा। केवलाबाधारहिता॥

जघन्यामाह-ज्ञानदर्शनावरणान्तरायमोहानामन्तमुहूर्तं लघ्वन्तर्मुहूर्तमबाधा। वेदनीयस्य कषायप्रत्ययस्य १२ मुहूर्ता। अन्तर्मुहूर्तमबाधा। योगप्रत्ययस्य द्वौ समयौ स नेहाधिक्रियते। नामगोत्रयोरष्टौ मुहूर्ता। अन्तर्मुहूर्तमबाधा। आयुषः क्षुल्लकभवग्रहणं जघन्या स्थितिः।

दोन्निसयाइम्मि समया समओ सधायणो य तेऊणं। खुड्डागभवग्गहण सव्वजहन्नो ठिई कालो॥
खुड्डगभवा साहीया सत्तरस हवन्ति एगपाणुम्मि। पाणू एगमुहुत्ते तिसत्तरासत्ततीससया॥
पणसट्ठिमहस्सपणसयछत्तीसा इगमुहुत्तखुड्डभवा। दो य सया छप्पन्ना आवलियाणेग खुड्डभवो॥

अन्तर्मुहूर्तमबाधा। उत्तरासु तत्र ज्ञानाव० ५ दर्शन० ९ असात० १ अन्तराय० ५=२० त्रिंशत् सागरकोटाकोटच उत्कृष्टा स्थितिः। सातस्त्रीवेदनृद्विकानां पञ्चदशसाग०। मिथ्यात्वस्य सप्ततिः सा०। कषायषोडशकस्य चत्वारिंशत् सा०। नपुंसकारतिशोकभयजुगुप्सानरकद्विकतिर्यग्द्विकएक-पञ्चेन्द्रियजात्यौदारिकद्विकवैक्रियद्विकतैजसकार्मणहुंडसेवार्तवर्णादिचतुष्कागु[रु]लघूपघातपराघातोच्छ्वासातपोद्योताप्रशस्तविहायोगतिस्थावरत्रसबादरपर्याप्तप्रत्येकाऽस्थिराऽशुभदुर्भगदुस्वरानादेयाऽयशःकीर्तिनिर्माणनीचैर्गोत्राणां ४३ विंशतिः सा०। पुंवेदहास्यरतिदेवद्विकतुल्यवज्रर्षभनाराचशुभखगतिस्थिरशुभसुभगसुस्वरादेययशःकीर्त्युच्चैर्गोत्राणां १५ दशसाग०। न्यग्रोधऋषभनाराचयोर्द्वादशसा०। सादिनाराचयोश्चतुर्दशसा०। कुब्जार्धनाराचयोः षोडशसा०। वामनकीलिकाद्वित्रिचतुर्जातिसूक्ष्माऽपर्याप्तसाधारणानामष्टादशसा०। सर्वत्रैकसागरकोटाकोटयामेकं वर्षशतमबाधा। द्वाभ्यां द्वे इत्यादि। आहारकद्विकतीर्थकरयोः सागरान्तःकोटाकोटिस्थितिः। अन्तर्मुहूर्तमबाधा। अबाधाकालादनन्तरं कर्मणामुदयः किन्तु यद्युदयन्ति तदा। ([अबा]धानन्तरमेव बद्धस्पृष्टनिधत्ताधिकारणात्।) नारकदेवा-

युषोस्त्रयस्त्रिंशत् सागराणि । तिर्यग्[न]रायुषोस्त्रीणिपल्योपमानि । जघन्यस्थितिस्तु वृत्तितो ज्ञेया। स्थितेः साद्यादीनाह–

मूलठिईण[अ]जहन्नो सत्तण्हं साइयाइउ बन्धो ।
सेसतिगे दुविगप्पो आउचउक्के वि दुविगप्पो ॥ ५९ ॥

जघन्याजघन्योत्कृष्टानुत्कृष्टाः ४ स्थितिबन्धाः । तत्रायुर्वर्जसप्तकर्मणां याः स्थितयस्तासां योऽजघन्यो बन्धः स सादिरनादिरध्रुवोध्रुवश्च भवति । कथं ? मोहस्य क्षपकानिवृत्तौ चरमस्थितिबन्धे जघन्यः शेषषट्कस्य सूक्ष्मक्षपकचरमस्थितिबन्धे जघन्योऽतोऽन्यः सर्वोऽप्युपशमश्रेणावप्यजघन्यः । उपशमकोऽपि क्षपकात् द्विगुणबन्धक इत्यजघन्यः । ततः उपशान्तावस्थायामजघन्यस्याबन्धको भूत्वा निपत्य पुनः कर्मसप्तकस्याजघन्यं बध्नतः सादिः । उपशान्तावस्थामप्राप्तानामनादिः ।अभव्यभव्ययोध्रुवाध्रुवौ, शेषत्रिकं जघन्योत्कृष्टानुत्कृष्टरूपं । तत्र सादिरध्रुवश्च । जघन्योऽजघन्यादवतीर्य तत्प्रथमतया तं बध्नतः सादिः । क्षीणावस्थायां न भवतीत्यध्रुवः । उत्कृष्टस्त्रिंशत्सागरकोटाकोटयः संक्लिष्टमिथ्यादृष्टिसंज्ञिनि लभ्यते । सर्वकेन्द्रियाद्यनुत्कृष्टबन्धादवतीर्य कदाचिद् बध्यत इति सादिः । अन्तर्मुहूर्तादनुत्कृष्टं बध्नतोऽध्रुवः । उत्कृष्टाद् बध्यत इत्यनुत्कृष्टोऽपि सादिः । अन्तर्मुहूर्तादनन्तोत्सर्पिण्यवसर्पिण्यन्ते उत्कृष्टं बध्नतोऽध्रुवः ।

'आउ' त्ति आयुर्बन्धमाश्रित्य पदचतुष्कं जघन्याजघन्योत्कृष्टानुत्कृष्टरूपं तत्र सादिरध्रुवश्च । आयुषो द्वित्रिभागादौ बध्यत इति सादिरन्तर्मुहूर्तादुपरमत इत्यध्रुवः । उत्तराणामाह–

अट्ठारसपयडीणं अजहन्नो बन्धु चउविगप्पो उ ।
साइयअधुवबन्धो सेसतिगे होइ बोदुधव्वो ॥ ६० ॥

ज्ञानाव० ५ दर्शन० ४ संज्वलन० ४ अन्तराय ५=अष्टादशानामजघन्यःसाद्यादिश्चतुर्धापि । तत्रोपशमश्रेणावजघन्यच्छेदे पुनरजघन्यं बध्नतः सादिः । श्रेणीमप्राप्तस्यानादिः, ध्रुवाधुवौ प्राग्वत् । शेषत्रिके जघन्योत्कृष्टानुत्कृष्टरूपे सादिरध्रुवश्चासामेव । तत्र संज्वलनचतुष्कस्य क्षपकानिवृत्तौ स्वस्वच्छेदोऽर्वं न भवतीत्यध्रुवः । उत्कृष्टानुत्कृष्टयोरप्यारोहावतारे कुर्वतां साद्यध्रुवौ ।

उक्कोसअणुक्कोसो जहन्नअजहन्नओ य ठिइबन्धो ।
सायइअदुधुवबन्धो सेसाणं होइ पयडीणं ॥ ६१॥

उक्ताष्टादशेभ्यः शेषप्रकृतीनामुत्कृष्टोऽनुत्कृष्टो जघन्याऽजघन्यश्च स्थितिबन्धः सादिरध्रुवश्च भवति । कथं ? निद्रा ५ मिथ्यात्व १ आद्यकषाय १२ भयजुगुप्सातैजसकार्मणवर्णादि४अगुरुलघूपघातनिर्माणानां २९ शुद्धबादरपर्याप्तैकेन्द्रियो जघन्यं बन्धं करोति । ततोऽन्तर्मुहूर्तात्संक्लिश्याऽजघन्यं ततस्तत्रैव भवे भवान्तरे वा शुद्धितो जघन्यमेव परावृत्तेर्द्वावप्येतौ साद्यध्रुवौ । उत्कृष्टं त्वेतासां मिथ्यादृक्संक्लिष्टसंज्ञी करोति । मुहूर्तात् त्वनुत्कृष्टं [पुनः] कदाचिदुत्कृष्टमिति परावृत्तेः साद्यध्रुवौ । शेषाध्रुवाणां ७३ जघन्यादिबन्धोऽध्रुवत्वादेव सादिरध्रुवश्च । शुभाशुभत्वमाह–

सव्वासिंपि ठिईओ सुभासुभाणं पि होन्ति [अ] सुभाओ ।
माणुसतिरिक्खदेवाउगं च मोत्तूण सेसाणं ॥ ६२ ॥

सर्वासां शुभानामशुभानां च स्थितयोऽशुभा एव । यत स्थितीनां कारणं संक्लेशः कषायोदय इत्यर्थः, 'ठिइ अणुभागं कसायओ कुणइ' त्ति वचनात् । नन्वनुभागोप्यशुभो स्यात् । नैवं कषायवृद्धावशुभानां वर्धते शुभानां हीयते । मन्दत्वे तु शुभानां वर्धते, अशुभानां हीयते । परं नृतिर्यग्देवायुषां स्थितिं मुक्त्वा । एषां स्थितिवृद्धौ रसोऽपि वर्धत इति । प्रत्ययमाह—

सव्वठिईणं उक्कोसगो उ उक्कोससंकिलेसेण ।
विवरीए [उ] जहन्नो आउगति[ग]वज्जसेसाण ॥ ६३ ॥

सर्वमूलोत्तरकर्मस्थितीनामुत्कृष्टस्थितिबन्ध उत्कृष्टसंक्लेशेनैव भवति । विपरीते मन्दसंक्लेशे तु जघन्यः नृतिर्यग्देवायुस्त्रिकवर्जशेषाणां ज्ञेयः । त्रिकस्य तु स्थितिवृद्धौ रसो वर्धते । स्वामित्वमाह—

सव्वोकोसठिईणं मिच्छद्दिट्ठी उ बन्धओ भणिओ ।
आहारगतित्थयरं देवाउ[यं] वावि मोत्तूण ॥ ६४ ॥

सर्वमूलोत्तरप्रकृत्युत्कृष्टस्थितेः पर्याप्तसंक्लिष्टमिथ्यादृष्टिर्बन्धकः । प्रायेण यावता नृतिर्यगायुषी उत्कृष्टे विशुद्ध एव बध्नाति । सासादनश्चतेशुद्धोऽप्युत्कृष्टे न बध्नाति गुणपाताभिमुखत्वेन । आहारकद्विकं तीर्थंकरमुत्कृष्टं देवायुष्कं च मुक्त्वा, सम्यक्त्वसंयमप्रत्ययत्वात्तेषां । क एतान्यर्जयति—

देवाउयं पमत्तो आहारगमप्पमत्तविरओ य ।
तित्थयरं च मणुस्सो अविरयसम्मो समज्जेइ ॥ ६५ ॥

पूर्वकोटचायुः प्रमत्तयतिरप्रमत्तत्वाभिमुखस्त्रिभागाद्यसमये उत्कृष्टं त्रिभागाधिकत्रयस्त्रिंशत्सागररूपं देवायुर्बध्नाति । शुभेयं स्थितिरित्यप्रमत्तत्वाभिमुखत्वं । आहारकद्विकं त्वप्रमत्तः प्रमत्तत्वोन्मुख उत्कृष्टं करोति स्थितेरशुभत्वात् । तीर्थकरं त्वविरतसम्यग्मनुष्यः पूर्वं नरके बद्धायुष्को मिथ्यात्वं यत्र समये यास्यति ततोऽर्वाक्समये बध्नात्युत्कृष्टम् , तीर्थकरनाम्नो ह्यविरतादयो निवृत्त्यन्ता बन्धकाः, किन्तूत्कृष्टा स्थितिः संक्लेशोद्भवाऽतोऽविरतोपादानं. तिर्यञ्चोऽस्य पूर्वप्रतिपन्नाः प्रतिपद्यमानकाश्च भवप्रत्ययान्नेति मनुष्यग्रहणं । क्षायिकस्तु शुद्धत्वात् नोत्कृष्टबन्धकः श्रेणिकवत् ।

पन्नरसण्हं ठिइमुक्कोसं बंधंति मणुयतेरिच्छा ।
छण्हं सुरनेरइआ ईसाणंता सुरा तिण्हं ॥ ६६ ॥

अदेवमायुस्त्रयं, देवद्विकं, नरकद्विकं, द्वि-त्रि-चतुर्जातयो, वैक्रियद्विकं, सूक्ष्मं, अपर्याप्तं, साधारणं=१५ आसामुत्कृष्टां स्थितिं तिर्यङ्मनुष्या एव मिथ्यादृष्टयो बध्नन्ति । अत्यन्तसंक्लिष्टः शुद्धो वायुर्बन्धं न करोति । 'छण्हं' ति तिर्यग्द्विक-औदारिकद्विक-सेवार्तोद्योतानामुत्कृष्टस्थितिबन्धकाः सुरा नारकाश्च । सामान्योक्तावपि सेवार्तौदारिकाङ्गोपाङ्गयोरीशानोपरितना एव दृष्टव्याः, अधस्तना हि अष्टादशकोटाकोटिकां मध्य[मा]नामेव बध्नन्ति । उत्कृष्टां त्वेकेन्द्रिययोग्यामेव, तेषु तु संहननाङ्गोपाङ्गयोरभाव एव । 'ईसाणा' त्ति एकेन्द्रियातपस्थावराणामीशानान्ताः सुरा उत्कृष्टस्थितिकर्तारः उपरितना नैतेषूत्पद्यन्ते ।

चतुर्गतिकाः का उत्कृष्टा बध्नन्तीत्याह—

सेसाणं चउगइया ठिईमुक्कोसं करंति पयडीणं ।
उक्कोससंकिलेसेण ईसिमहमज्झिमेणावि ॥ ६७ ॥

उत्कृष्टचतुर्विंशतिशेषद्विनवतेश्चतुर्गतिमिथ्यादृष्टय उत्कृष्टां स्थितिं बध्नन्ति । 'उक्कोस' त्ति संक्लेशोऽध्यवसायस्थानम्, तत्र जघन्यस्थितिबन्धाध्यवस्यस्थानम्, तत्र जघन्यस्थितिबन्धाध्यवसाय स्थानान्यप्यसंख्येयलोकाकाशप्रदेशप्रमाणान्याहुः [तदनन्तरे स्थितिस्थाने तानि विशेषाधिकानि, एवमुत्त-रोत्तरस्थितिस्थाने विशेषाधिकक्रमेण तानि तावद्भवन्ति यावच्चरमस्थितिस्थानम् ।] तेषु प्रवर्धमानं ∴∴∴न्यस्त पंक्तिस्थितं यदुत्कृष्टं चरममध्यवसायस्थान तदुत्कृष्टसंक्लेश उच्यते । शेषाणि चरमपंक्ति-∴∴ स्थितानीषन्मध्यमान्युच्यन्ते । तैश्चरमपंक्तिवर्तिभिरुत्कृष्टस्थितिजनकैः सर्वैरपि उत्कृष्टास्थितिर्ज-न्यत इति भावः । जघन्यमाह—

आहारगतित्थयरं नियट्टिअनियट्टि पुरिससंजलणं ।
बंधइ सुहमसरागो सायजसुच्चावरणविग्घं ॥ ६८ ॥
छण्हमसन्नी कुणइ जहण्णं ठिइमाउगाणमन्नयरा ।
सेसाणं पज्जत्तो बायरएगिंदियविसुद्धो ॥ ६९ ॥

आहारकद्विकं तीर्थंकरं च निवृत्तिः क्षपकस्तद्बन्धस्य चरमे स्थितिबन्धे स्थितो जघन्यं बध्नाति । तद्बन्धकेष्वयमेव शुद्धः । नृतिर्यग्देवायुर्वर्जकर्मणां जघन्या स्थितिः विशुद्धया उक्ता । नृवेदसञ्ज्वलनानां ५ अनिवृत्तिक्षपको जघन्यां स्थितिं करोति । सातं यशःकीर्तिरुच्चैर्गोत्रं 'आवरण' ज्ञान० ५-दर्शन० ४-विघ्न० ५-सूक्ष्मश्चरमे स्थितिबन्धे जघन्यं करोति । नरकद्विक-देवद्विक-वैक्रियद्विक-षट्कस्य तिर्यग्संज्ञि-पर्याप्तो जघन्यां स्थितिं करोति । [आयु] श्चतुष्कस्य अन्यतरः संज्ञी असंज्ञी वा जघन्यां स्थितिं करोति । नारकदेवायुषोस्तिर्यङ्नराः, नृतिर्यगायुषोरेकेन्द्रियादयः । उक्तशेषाणामेकेन्द्रियाः बादरः पर्याप्तस्तद्बन्ध-केषु विशुद्धः पल्योपमासंख्येयभागहीनसागरद्विसप्तभागाधिकां जघन्यां स्थितिं करोति ॥ स्थितिबन्धः ॥

अनुभागमाह-इह जन्तुः पृथक्सिद्धानामनन्तभागवर्तिभिरभव्येभ्योऽनन्तगुणैः परमाणुभिः-निष्पन्नान् कर्मस्कन्धान् प्रतिसमयं गृह्णाति । तत्र प्रतिपरमाणुकषायविशेषात्सर्वजीवानन्तगुणाननुभाग-स्याविभागपलिच्छेदान् करोति । तत्र समपरमाणुनामेका वर्गणा । रसांशेनाधिकानां द्वितीयेत्यादि । स च रसः शुभोऽशुभश्च द्विधाप्येक-द्वि-त्रि-चतुःस्थानिकः । यथा लि[नि]म्बादीनां सहज एकस्थानिकः । क्वाथेऽर्धावर्तो द्वि० । त्रिभागे ति० चतुर्भागे च० । सर्वेऽपि लवबिन्दुचुलुकादिमन्दमन्दतरादिभेदादने-कधा, मिश्रो अप्यनेकधा । रसस्य साद्यादीन्याह-

घाईणं अजहन्नो (अ)णुक्कोसो वेयणीयनामाणं ।
अजहन्न अणुक्कोसो गोए अणुभागबन्धम्मि ॥ ७० ॥
साइअणाई धुवअद्धुवा य बन्धो उ मूलपयडीणं ।
सेसम्मि उ दुविगप्पो आउचउक्के वि दुविगप्पो ॥ ७१ ॥

घातिकर्मणा[म]जघन्योरसः साद्यादिश्चतुर्धापि भवति । द्वितीयगाथायां सम्बन्धः । अशुभानां जघन्यं शुभानामु[त्कृष्टं] यः कश्चित्तद्बन्धकेषु विशुद्धः स एव जनयति । तत्र ज्ञानदर्शनावरणा-न्तरायकर्मणामशुभत्वात् क्षपकसूक्ष्मोऽन्त्यसमये जघन्यं रसं मोहस्य त्वनिवृत्तिर्जघन्यं रसं करोति । तत उपशान्तेऽजघन्यस्याबन्धको भूत्वा निपत्य पुनर्बध्नतः सादिः उपशान्तमप्राप्तानामनादिः, ध्रुवा-ध्रुवौ प्राग्वत् । द्वितीयगाथार्धे 'सेसम्मि उ' त्ति शेषे जघन्योत्कृष्टानुत्कृष्टत्रिकरसे द्विविकल्पः, साद्य-ध्रुवरूपो घातिचतुष्कस्य । तत्र पूर्ववद्यावद् जघन्यं लभते तदा सादिः । क्षीणे नासादित्यध्रुवः । उत्कृष्टरसं तु प्रकृतकर्मणामशुद्धत्वात् क्लिष्टो मिथ्यादृष्टिः पर्याप्तासंज्ञी एकं द्वौ वा समयौ

यावद्बध्नाति । स चानुत्कृष्टाद् बध्यत इति सादिः । जघन्यतः समयादुत्कृष्टतो द्विसमयादनुत्कृष्टं गतस्याध्रुवः । अनुत्कृष्टस्तु सादिर्भवति पुनर्जघन्यतोऽन्तर्मुहूर्तेन उत्कृष्टतः अनन्तानन्तोत्सर्पिण्यवसर्पिणीभिरुत्कृष्टं गतस्याध्रुवः । अनुत्कृष्टरसो वेदनीयनाम्नोश्चतुर्धापि । तथाहि—एतदन्तर्गते सातयशःकीर्ती आश्रित्योत्कृष्टरसः क्षपकसूक्ष्मान्त्यसमये प्राप्यते । ततोऽन्य उपशमश्रेणावप्यनुत्कृष्टः । तत्रोपशान्तेऽबन्धको भूत्वा निपत्यानुत्कृष्टं बध्नतः सादिः । तमप्राप्तानामनादिः । ध्रुवाध्रुवौ प्राग्वत् । शेषत्रिके द्विविकल्पोऽत्रापि तत्रोत्कृष्ट सूक्ष्मे बध्नातीति सादिः । क्षीणे यातीत्यध्रुवः । जघन्यरसं त्वनयोः सम्यग्दृग् मिथ्यादृग् वा बध्नाति मध्यमपरिणामः, अयं चाजघन्यात् भवतीति सादिः । पुनर्जघन्यतः समयादुत्कृष्टतः चतुस्समयादजघन्यं बध्नतोऽध्रुवः । अजघन्यस्तु सा[सा]दिः । तत्रैव भवे भवान्तरे वा जघन्यं बध्नतोऽध्रुवः । 'अजहन्न'त्ति गोत्रानुभागबन्धोऽजघन्योऽनुत्कृष्टश्च चतुर्धापि । तत्रोत्कृष्टानुत्कृष्टौ वेदनीयनाम्नोरिव चिन्त्यौ । जघन्यं तु सप्तमपृथ्विनारकः करणत्रयादनन्तरमन्तःकरणस्थितिद्वयं करोति ॰ तत्राधस्तनीं वेदयन्यस्मादनन्तरं समये सम्यक्त्वं प्राप्स्यति तत्रान्त्यसमये वर्तमानो नीचैर्गोत्रस्य जघन्यं रसं बध्नाति । न शेषा इति सादिः । तस्मादनन्तरमजघन्यरसमुच्चैर्गोत्रस्य बध्नातीत्यध्रुवः । अजघन्यस्तु सादिः । तदप्राप्तानामनादिः । ध्रुवाध्रुवौ प्राग्वत् । एवं जघन्यो द्विधा अजघन्यश्चतुर्धा । 'आउ' त्ति चतुर्गत्यायुर्जघन्याजघन्योत्कृष्टानुत्कृष्टरसचतुष्के सादिरध्रुवश्च द्विधा । तत्र त्रिभागादौ सादिश्चतुर्धापि अन्तर्मुहूर्ताद्यातीत्यध्रुवः । उत्तराणामाह—

अट्ठण्हमणुक्कोसो तेयालाणमजहन्नगो बंधो ।
णेओ हु चउविगप्पो सेसतिगे होइ दुविगप्पो ॥ ७२ ॥

तैजसकार्मणप्रशस्तवर्णगन्धरसस्पर्शअगुरुलघुनिर्माणानां ८ अनुत्कृष्टश्चतुर्धापि । तथा ह्यासामुत्कृष्टरसं क्षपकनिवृत्तिर्देवगतियोग्यानां त्रिंशतः प्रकृतीनां बन्धच्छेदसमये करोति । ततोऽन्यस्तूपशमश्रेणावप्यनुत्कृष्टः । स चोपशान्तेऽबन्धको भूत्वा पुनर्लाभे सादिः । तत्राप्राप्तानामनादिः । शेषं प्राग्वत् शेषत्रिके द्विविकल्पः । तत्र पूर्वोक्त निवृत्तावुत्कृष्टः सादिः । समयाद्यातीत्यध्रुवः । जघन्यरसं त्वासां शुभत्वात् क्लिष्टमिथ्यादृक्संज्ञी बध्नाति । पुनर्जघन्यतः समयादुत्कृष्टतो द्विसमयादजघन्यं पुनर्जघन्यमेवमुभयोः साद्यध्रुवता । 'तेयाल' त्ति ज्ञानाव० ५ दर्शन० ९-मिथ्यात्व १-कषाय १६-भयजुगुप्सा २-अप्रशस्तवर्णादि ४ उपघातान्तरायाः ५ णां ४३ अजघन्यश्चतुर्धाऽपि । तत्र ज्ञान० ५-दर्शन० ४-अन्तराया ५ णाम १४ शुभत्वात् क्षपकः सूक्ष्मोऽन्त्यसमये जघन्यरसं बध्नाति तस्मादुपशान्ते[ऽबद्ध्वा पुनः]अजघन्यं बध्नतः सादिः । उपशान्तमप्राप्तानामनादिः । शेषं प्राग्वत् । संज्वलनानां ४ क्षपकानिवृत्तिर्यथास्वं बन्धच्छेदे एकैकं समयं जघन्यं रसं बध्नाति । ततोऽन्योऽजघन्यः । तस्योपशान्तेऽबन्धःपुनर्बध्नतः सादिः । तमप्राप्तानामित्यादि तथैव । निद्राप्रचला-शुभवर्णादि ४-उपघातभयजुगुप्सानां क्षपकनिवृत्तिर्बन्ध(न)च्छेदे एकैकं समयं जघन्यरसं बध्नाति । ततोऽन्योऽजघन्यः । तमुपशान्तेऽबद्ध्वा पुनर्बन्धे सादिः । तमप्राप्तानामित्यादि तथैव । प्रत्याख्यानानां ४ देशविरतोऽन्त्यसमये जघन्यरसं बध्नाति । अप्रत्याख्यानानां ४ अविरतः क्षायिकत्वं संयमं च युगपत् प्रतिपित्सुर्जघन्यं बध्नाति । स्त्यानर्द्धित्रिकमिथ्यात्वानन्तानुबन्धिनः ८ मिथ्यादृक् सम्यक्त्वं संयमं चेप्सुर्जघन्यरसं करोति । सर्वत्राऽन्योऽजघन्यः । एते निपत्य पुनर्बध्नतः साद्यादयो वाच्याः । शेषत्रिके जघन्योत्कृष्टानुत्कृष्टरूपे द्विविकल्पः । (जघन्यः सूक्ष्मे सादिः क्षीणे यातीत्यध्रुवः) । उत्कृष्टस्य मिथ्यादृक्बन्धकः सादिः । पुनरनुत्कृष्टेऽध्रुवः । एवमनुत्कृष्टोऽपि ।

अध्रुवबन्धिनीनामाह—

उक्कोसमणुक्कोसो जहन्नमजहन्नगो वि अणुभागो ।
साई अदुधुवबन्धो पयडीणं होइ सेसाणं ॥ ७३ ॥

शेषाणामध्रुवाणां चतुर्धाऽपि साद्यध्रुवः, अध्रुवबन्धित्वात् । प्रत्ययानाह—

सुहपयडीण विसोहीइ तिव्वमसुहाण संकिलेसेण ।
विवरीए उ जहन्नो अणुभागो सव्वपयडीणं ॥ ७४ ॥

वक्ष्यमाणशुभप्रकृतीनां विशुद्धया तीव्रं रसं बध्नाति, अशुभानां संक्लेशेन । वैपरित्ये जघन्यः शुभानां संक्लेशादशुभानां विशुद्धया भवति । शुभाशुभा आह—

बायालं पि पसत्था विसोहि गुणउक्कडस्स तिव्वाओ ।
बासीइमप्पसत्था मिच्छुक्कडसंकिलिट्ठस्स ॥ ७५ ॥

सातं, तिर्यग्नृदेवायूंषि, नृद्विकं, देवद्विकं, पञ्चेन्द्रियजातिः, पञ्चशरीराणि, तुल्यं वज्रर्षभनाराचं, अङ्गोपाङ्ग ३, शुभवर्णादि ४, अगुरुलघु पराघात उच्छवासं, आतपं, उद्योतं, शुभखगतिस्त्रसादिदशकं, निर्माणं, तीर्थंकरमुच्चैर्गोत्रं, ४२ एता एव प्रशस्ताः, विशुद्धिगुणोत्कटस्य तीव्ररसा भवन्ति । ज्ञानाव० ५, दर्शन० ९, असातं, मिश्रसम्यक्त्ववर्जमोहषड्विंशतिः, नारकायुः, नरकद्विकं, तिर्यक्द्विकं, एक-द्वि-त्रि-चतुर्जातयः, आद्यवर्जसंस्थानसंहनन १०, अशुभवर्णादि ४, उपघातं, अशुभखगतिः स्थावरादिदशकं, नीच्चैर्गोत्रं, अन्तराय ५=८२ एता अप्रशस्ता मिथ्यात्वोत्कटसंक्लिष्टस्य तीव्ररसा भवन्ति ।

卐 [आयवनामुज्जोयं माणुसतिरियाउगं पसत्थासु ।
मिच्छस्स हुंति तिव्वा सम्मद्दिट्ठिस्स सेसाओ ॥ ७६ ॥

आतपोद्योतमनुष्यतिर्यगायुःप्रकृतीनां तीव्ररसबन्धका मिथ्यादृष्टयो भवन्ति] । यत आतपोद्योततिर्यगायूंषि सम्यक्दृष्टिर्न बध्नात्येव । देवनारकास्तु सम्यग्दृशो मध्यमं नरायुर्बध्नन्ति न युगलायुरिति । शेषाः ३८ पुण्यप्रकृतयः सम्यग्दृष्टेरेव तीव्ररसा भवन्ति ।

देवाउमप्पमत्तो तिव्वं खवगा करंति बत्तीसं ।
बंधंति तिरियमणुया एक्कारसमिच्छभावेण ॥ ७७ ॥

देवायुस्तीव्र[र]समप्रमत्तयतिर्बध्नाति तथा सात-देवद्विक-पञ्चेन्द्रियजाति-वैक्रियद्विकआहारकद्विक-तैजसकार्मण तुल्य-शुभवर्णादि ४-अगुरुलघु-पराघातोच्छ्वास-शुभखगति-त्रसादि १०-निर्माण तीर्थंकरोच्चैर्गोत्राणां ३२ क्षपको सूक्ष्मनिवृत्ती तीव्र (रसं) रसं कुरुतः । निवृत्तिर्मोहक्षपणयोगतया क्षपकः । तत्र सातयशःकीर्त्युच्चैर्गोत्राणां ३ सूक्ष्मोन्त्यसमये तीव्ररसं करोति । शेषाणां २९ निवृत्तिर्देवयोग्यबन्धच्छेदसमये तीव्रं रसं करोति । 'बंधंति' त्ति नारकतिर्यङ्नरायूंषि, नरकद्विकं, विकलत्रिकं; सूक्ष्मं, अपर्याप्तं, साधारणं ११ एता मिथ्यादृशास्तिर्यङ्मनुष्याः तीव्ररसा बध्नन्ति । देवानारकाश्च नव भवप्रत्ययाश्च बध्नन्ति । तिर्यङ्नरायुषी उत्कृष्टयुगलेषु तेष्वपि ते न उत्पद्यन्ते ।

पञ्चसुरसम्मदिट्ठी सुरमिच्छो तिन्नि अयइ पयडीओ ।
उज्जोयं तमतमगा सुरनेरइआ भवे तिण्हं ॥ ७८ ॥

卐 कोष्ठकद्वयान्तर्गता गाथायुक्तपाठ. ह. लि. प्रतौ नास्ति, तथाप्युपयोगित्वाल्लिखितः ।

नृद्विकौदारिकद्विकाद्यसंहननानां ५ सुरः सम्यग्दृगुत्कृष्टरसबन्धक एकं द्वौ वा समयौ, नारकाणां वेदनया तीर्थाद्यदर्शनात् शुद्धिः, तिर्यङ्नराः शुद्धाः सुरेषु यान्ति । एकेन्द्रियजात्यातपस्थावरत्रयस्य सुरो मिथ्यादृगीशानान्त उत्कृष्टरसं बध्नाति । द्वयं संकिलष्ट आतपं तु शुभत्वात् तद्योग्यशुद्धः । अतिशुद्धो नरः स्यात् । उद्योतं तमस्तमकाः सप्तमपृथ्विनारकास्तीव्रं उपशमिकोन्मुखाः कुर्वन्ति । सुराः सनत्कुमारादयो नारका वा संक्लिष्टाः स्युस्तिर्यग्द्वयसेवार्तत्रयस्य तीव्ररसकर्तारः । शुभाः ४२ अशुभाः १४ उक्ताः । अष्टषष्टिमाह--

सेसाणं चउगइगा तिव्वणुभागं कुणंति पयडीणं ।
मिच्छद्दिट्ठी नियमा तिव्वकसाउक्कडा जीवा ॥ ७९ ॥

शेषाणां ज्ञानाव० ५ दर्शन ९-असात-मिथ्यात्व-कषाय १६-नोकषाय ९-अनाद्यसंस्थान ५ अनाद्यन्तसंहनन ४-अशुभ वर्णादि४-उपघाताऽशुभखगत्यस्थिराशुभदुर्भगदुःस्वरानादेयायशःकीर्तिनीचैर्गोत्रान्तरायाणां ६८ अशुभानां मिथ्यादृष्टयस्तीव्रकषायोत्कटास्तीव्रं रसं कुर्वन्ति । तत्र हास्यरतिस्त्रीपुंवेदानाद्यन्तसंस्थानसंहनननानां १२ तत्प्रायोग्यक्लिष्टाः. शेषाणामुत्कृष्टक्लिष्टाः कुर्वन्ति । उत्कृष्टसंक्लेशे अप्रेतनयुगलं नपु सकत्वं च सहननसंस्थाने सेवार्तहुंडे च स्युः । जघन्यमाह-

चोद्दस सरागचरिमो पंचगमनियट्टिनियट्टि एक्कारं ।
सोलसमंदणुभागं संजमगुणपट्ठिओ जयइ ॥ ८० ॥

ज्ञानाव० ५-दर्शन ४ अन्तरायाणां ५=१४ सूक्ष्मोऽन्त्यसमये जघन्यरसं बध्नाति । पुंवेद १-संज्वलन ४ पञ्चकमात्मीयात्मीयबन्धच्छेदेऽनिवृत्तिर्जघन्यं रसं करोति । निवृत्तिर्निद्राप्रचला-ऽशुभवर्णादि ४ उपघात हास्यरति-भयजुगुप्सानां ११ आत्मीयात्मीयबन्धच्छेदे जघन्यं रसं बध्नाति । स्त्यानर्द्धित्रिक-मिथ्यात्व संज्वलनवर्जकषाय १२=षोडशानां मन्दरसं संयमाभिमुखो मिथ्यादृगविरतो देशविरतो वा करोति । तत्र स्त्यानर्द्धित्रिकमिथ्यात्वाद्यकषायाणां ८ अन्त्यसमये मिथ्यादृष्टिः । अप्रत्याख्यानानामविरत, प्रत्याख्यानानां देशविरतो मन्दं रसं करोति ।

आहारमप्पमत्तो पमत्तसुद्धो उ अरइसोगाणं ।
सोलस माणुसतिरिया सुरनारयतमतमा तिन्नि ॥ ८१ ॥

आहारकद्विकमप्रमत्तः प्रमत्तत्वोन्मुखो जघन्यरसं करोति । अरतिशोकयोः प्रमत्तोऽप्रमत्तत्वोन्मुखः शुद्धो जघन्यं रसं करोति । आयुश्चतुष्क-नरकद्विक-देवद्विक-वैक्रियद्विक-विकलत्रिक-सूक्ष्मापर्याप्त-साधारणानां १६ नरास्तिर्यञ्चश्च जघन्यरसं कुर्वन्ति । तिर्यङ्नरायुर्वर्जाश्चतुर्दश देवनारका भवप्रत्ययादेव न बध्नन्ति । तिर्यङ्नरायुषी अपि मन्दरसे न बध्नन्ति । सुरनारकास्तिस्त्रः तमतमकाश्च तिस्त्रो जघन्यरसाः कुर्वन्ति । तत्रौदारिकद्विकोद्योतास्तिस्त्रः सुरनारकाणामुत्कृष्टक्लेशास्तिर्यग्योग्या बध्नन्तो जघन्यरसा कुर्वन्ति । तिर्यग्द्विकनीचैर्गोत्रास्तिस्त्रस्तमस्तमस्काः, सम्यक्त्वोन्मुखा इति ।

एगिंदियथावरगं मन्दणुभागं करंति तेगइआ ।
परिअत्तमाणमज्झिमपरिणामा नेरइयवज्जा ॥ ८२ ॥

नारकवर्जा गतित्रयजीवाः परावर्तमानमध्यमपरिणामा एकेन्द्रियस्थावरयोर्जघन्यरसं बध्नन्ति। तत्क्लिष्टाः शुद्धा वा। तदैवैकेन्द्रियस्थावरत्वं तदैवपञ्चेन्द्रिय[त्रस]त्वं तदैवैकेन्द्रियस्थावरत्वमिति परावृत्तिः। नारकाः स्वभावात् तद्द्वयं बध्नन्ति ।

आसोहम्मायावं अविरयमणुओ उ जयइ तित्थयरं ।

चउगइउक्कडमिच्छो पन्नरस दुवे विसोहीए ॥८३॥

समश्रेणित्वादीशानान्ता भवनपत्यादयः आतपं क्लिष्टा मन्दरसं बध्नन्ति। अविरतसम्यग्[दृग्]-मनुष्यो बद्धनरकायुष्को मिथ्यात्वोन्मुखस्तीर्थंकरं मन्दरसं करोति। तथा चतुर्गतिका अपि उत्कृष्ट(मिथ्या-त्व)संक्लेशाः पञ्चेन्द्रियतैजसकार्मणप्रशस्तवर्णादि ४ अगुरुलघुपराघातोच्छ्वासत्रसबादरपर्याप्तप्रत्येक-निर्माणानां १५ जघन्यं रसं कुर्वन्ति शुभत्वात्। परं तिर्यङ्नरा नरकयोग्याः, नारकाः सनत्कुमारादयश्च पञ्चेन्द्रियतिर्यग्योग्या एता मन्दाः कुर्वन्ति। ईशानान्तास्तु पञ्चेन्द्रियत्रसवर्जा १३ एकेन्द्रिययोग्याः। पञ्चेन्द्रियत्रसे तु शुद्धा एव (२८)'१८] स्त्रीनपुंसके द्वे चतुर्गतिका अपि तद्योग्यशुद्धा मन्दरसे कुर्वन्ति।

सम्मद्दिट्ठी मिच्छो व अट्ठ परियत्तमज्झिमो जयइ ।

परियत्तमाणमज्झिममिच्छद्दिट्ठी उ तेवीसं ॥८४॥

सम्यग्दृग्-मिथ्यादृग् वा सातासातस्थिरास्थिरशुभाशुभयशःकीर्त्ययशःकीर्तीः परावर्तमानमध्यम-परिणामो मंदरसाः करोति । नृद्विकसंस्थानषट्कसंहननषट्कखगतिद्विकसुभगदुर्भगसुस्वरदुःस्व-रादेयानादेयोच्चैर्गोत्र(ाः)त्रयोविंशतिं परावृत्य परावृत्य बध्नतश्चतुर्गतिका अपि मिथ्यादृष्टयो मध्यम-परिणामा मंदरसां कुर्वन्ति। सम्यग्दृशामेतासां परावृत्तिर्नास्ति। तथाहि-तिर्यङ्नराः सम्यग्दृशो देवद्विकमेव बध्नन्ति, न नृद्विकादि । देवास्तु नृद्विकमेव न तिर्यग्द्विकादि, संस्थानाद्यपि शुभमेव नाशुभमिति न परावृत्तिः। सर्व१देश२घातिनीः प्राह--

केवलनाणावरणं, दंसणछक्कं च मोहबारसगं ।

ता सव्वघाइसन्ना, हवंति मिच्छत्तवीसइमं ॥८५॥

केवलज्ञानावरणं, निद्रापञ्चक-केवलदर्शनरूपषट्कं, मोहे संज्वलनवर्जकषाय १२ मिथ्यात्वं एता २० सर्वघातिन्यः, स्वाऽऽवार्यं गुणं सर्वमपि घ्नन्ति, परं केव[ल]स्यांशः सर्वजीवेष्वनावृत एव, मेघोन्नतौ चन्द्रसूर्ययोः प्रभेव ।

नाणावरणचउक्कं, दंसणतिगअंतराइयं पंच ।

पणुवीसदेसघाई, संजलणा नोकसाया य ॥८६॥

ज्ञानावरणचतुष्कं मतिश्रुत-अवधि-मनःपर्यायरूपं, दर्शनत्रिकं चक्षुरचक्षुरवधिरूपं, अन्तराय-पंचकं, पंचविंशतिर्देशघातिन्यः, संज्वलनाः ४ नोकषायाश्च ९ = २५ 'सव्वे वि य अइयारा संजल'...... ।

अवसेसा पयडीओ, अघाइया घाइयाइपलिभागा ।

ता एव पुन्नपावा, सेसा पावा मुणेयव्वा ॥८७॥

शेषाः ७५ वेदनीयायुर्नामगोत्रप्रकृतयो ज्ञानदर्शनचारित्रादिगुणानां मध्ये न किञ्चिद् घातयन्ती-त्यघातिन्यः परं घातिनीभिः सह वेद्यमानाः पलिभागास्तत्तुल्या दृश्यन्ते, यथाऽचोरोऽपि चौरैर्मिलितो चोर इव दृश्यते। एता एव काश्चित्साताद्याः ४२ पुण्यप्रकृतयः, काश्चिदसाताद्याः ३३ पापाः, शेषा सर्वदेशघातिन्यः पापा एव ज्ञेयाः। रसस्थानान्याह--

आवरणदेसघायंतरायसंजलणपुरिससत्तरसं ।
चउविहभावपरिणया, तिविहपरिणया भवे सेसा ॥८८॥

आवरणेषु देसघातीनि ज्ञान० ४-दर्शन-३ अन्तराय ५-संज्वलन ४-नृवेद=१७ एताश्चतुर्विधभावे परिणता एक-द्वि-त्रि-चतुःस्थानिकरूपेण । तत्रानिवृत्तेः संख्येयभागेष्वासामशुभत्वादेकस्थानिक एव रसो बध्यते । अत्रान्तरे केवलद्विकं बध्यते परं सर्वघातित्वाद्द्विस्थानिकरसोऽस्तस्याऽत्राऽग्रहणम् । शेषस्तु द्विस्थानिकादिको रसः प्रस्तुतप्रकृतीनां मिथ्यादृष्टयादिषु लभ्यते । तत्र गिरिराजिसमकोपश्चतुस्थानिकम्, पृथ्वीराजिसमस्त्रिस्थानिकम्, रेणुजलराजिसमो द्विस्थानिकमिति बध्नाति । द्वि-त्रि चतुःरूपत्रिविधरस-परिणता एतच्छेषाः शुभाशुभा वा । एकस्थानिकं त्वासां न संभवत्येव । यतोऽनिवृत्तेः संख्येयभागेष्वेवासौ बध्यते तत्र सप्तदश मुक्त्वा शेषाऽशुभप्रकृतयो न बध्यन्त एव ।

अथ शुभानामेकस्थानिकः कस्मान्नेत्युच्यते, इहासंख्येयलोकाकाशप्रदेशमानानि सक्लेशस्थानानि विशुद्धिस्थानानि च । येष्वेव सक्लिष्टश्चटति तेष्वेव सोपानेष्विव विशुद्धोऽवरोहति । परं शुद्धिस्थाना-न्यधिकानि यतः क्षपको [ये]ष्वेवारोहति न तेष्ववरोहति क्लेशाभावात् । तैराधिक्यं एवं स्थितेऽति-शुद्धश्चतुस्थानिकं बध्नाति शुभानाम् । अतिक्लेशे बन्ध एव नागच्छन्ति शुभाः । या अपि नरकयोग्या वैक्रियतैजसकार्मणाद्याः शुभाः संक्लिष्टो बध्नाति तासामपि स्वभावाद् द्विस्थानिक एव रसः, इति न शुभानामेकस्थानिको रसः क्वापि । प्रत्ययमाह–

चउपच्चएगमिच्छत्तसोलस-दुपच्चया य पणतीसं ।
सेसा तिपच्चया खलु तित्थयराहारवज्जाओ ॥८९॥

एका सातरूपा प्रकृतिश्चतुःप्रत्यया मिथ्यात्वाऽविरतिकषाययोगैर्बध्यते । मिथ्यात्वप्रत्ययाः षोडश 'सोलसमिच्छत्तंता' इति वचनात् । द्विप्रत्ययाः पञ्चत्रिंशत् सासादनेऽविरते च यासां ३५ बन्धच्छेद उक्तस्तास्तत्र मिथ्यात्वेऽपि बध्यन्त इति मिथ्यात्व[अविरति] प्रत्ययाः, शेषं द्वयं गौणं । शेषाः त्रिप्रत्ययाः तीर्थंकरमाहारकं च त्यक्त्वा मिथ्यादृष्टयादिष्वविरतेषु सकषायेषु च सूक्ष्मान्तेषु बध्यन्त इति । उपशान्तादिषु योगसद्भावेप्यासां बन्धो नास्तीति स नोक्तः, सम्यक्त्वनिमित्तं तीर्थंकरं संयमेना-हारकमिति वर्जनम् । विपाकान् विभागेनाह––

पंच य छत्तिगछप्पंच दुण्णि पंच य हवन्ति अट्ठेव ।
सरिराई फासन्ता पयडीओ आणुपुव्वीए ॥९०॥
अगुरुलहु उवघायं परघाउज्जोयआयवनिमेणं ।
पत्तेयथिरसुभेयरणामाणि य पुग्गलविवागा ॥९१॥

शरीराद्याः स्पर्शान्ताः शरीरसंस्थानाङ्गोपाङ्गसंहननवर्णगन्धरसस्पर्शरूपा अष्टौ पिण्ड-प्रकृतयः । किं भवन्ति पुद्गलविपाका इति उत्तरगाथान्ते सम्बन्धः । आनुपूर्व्या पञ्चादिभेदाश्च । कथं ? पञ्चशरीराणि षट्संस्थानानि त्रिण्यङ्गोपाङ्गानि षट्संहननानि पञ्चवर्णाः द्वौ गन्धौ पञ्चरसाः अष्टौ स्पर्शाः एताः पुद्गलेष्वेव विपच्यन्ते शरीरादिपुद्गलेष्वेवात्मीयां शक्तिं दर्शयन्तीत्यर्थः । कथं ? शरीरनामोदयात् शरीरतया पुद्गला एव परिणमन्तीत्यादि वाक्यम् । तथाऽगुरुलघूपघातपराघातोद्योतातपनिर्माणानि, प्रत्ये-कादिष्वितरेण योगः, प्रत्येकसाधारणस्थिरास्थिरशुभाशुभाश्च पुद्गलविपाकाः ॥९०॥९१॥

आऊणि भवविवागा खेत्तविवागा उ आणुपुव्वीओ।
अवसेसा पयडीओ जीवविवागा मुणेयव्वा ।।९२।।

भवन्ति जन्तवोऽस्मिन्निति भवो, विग्रहगतेरारभ्य हृद्यः। तत्र भव एव विपाक-उदयो येषां तानि भवविपाकीनि चत्वार्यायूंषि प्राग्भवे बद्धानि आगामिभवे विपच्यन्त इति भावः। क्षे[त्र]माकाशं तत्रैव विपाक उदयो यासां ता क्षेत्रविपाका आनुपूर्व्यः ४ विग्रहगतावेवासां उदयः। अवशेषा ज्ञानावरणादिकाः जीव एव विपाकः स्वशक्त्याऽऽविर्भावरूपो यासां ताः जीवविपाका ज्ञेयाः। यतो जीव एव ज्ञान्यज्ञानी वा न पुनस्तनुपुद्गला इति सर्वासु। या अपि पुद्गलभवक्षेत्रविपाकास्ता अपि वस्तुतो जीवविपाका एव पारम्पर्येण न मुख्यतया। अनुभागः [उक्तः] ॥ ९२ ॥

प्रदेशबन्धमाह-तत्र चत्वार्य[रोऽ]नुयोगाः (१) कर्मप्रदेशादानविधिः, (२) भागप्ररूपणा, (३) साद्यादिप्र० (४) स्वामित्वप्र०।

एगपएसोगाढं सव्वपएसेहिं कम्मुणो जोग्गं।
बंधइ जहुत्तहेउं साईयमणाइयं वावि ।।९३।।
पंचरस-पंचवण्णेहिं परिणयं दुविहगंधचउफासं।
दवियमणंतपएसं सिद्धेहिं अणंतगुणहीणं ।।९४।।

इह पुद्गलं द्रव्यं जीवो बध्नाति इति योगः। कथं ? एकप्रदेशावगाढं-यत्रैव जीवस्याऽऽत्मप्रदेशास्तत्रैव यदवगाढं न त्वन्यतः। स च सर्वैरप्याऽऽत्मीयप्रदेशैर्बध्नाति। न त्वेकेन द्वयादिभिर्वा। यतः समस्तलोकाकाशप्रदेशराशिप्रमाणा एकस्य जन्तोः प्रदेशा भवन्ति। मिथ्यात्वादिबन्धकारणोदये च ते सर्वे स्वस्वाकाशप्रदेशेभ्यो युगपदेव कर्मद्रव्यं गृह्णन्ति। परस्परं च सर्वेऽप्युपकुर्वन्ति परस्परं सम्बद्धत्वात्। कर्मणो योग्यं कर्मवर्गणान्तर्गत 'यथोक्तहेतु' पूर्वोक्तसामान्यविशेषहेतुभिर्बध्नाति। बन्धच्छेदं कृत्वा प्रतिपत्य ता एव यो बध्नाति तस्य सादिः। अकृतच्छेदस्याऽनादिः ध्रुवाऽध्रुवौ प्राग्वद् अपिशब्दात्। तच्च द्रव्यं प्रतिस्कन्धं पंचवर्णोपेतं, पंचरसं द्विगन्धं चतुःस्पर्शं च गृह्णाति। तत्र मृदुलघू अवस्थितौ द्वौ तु स्निग्धोष्णौ स्निग्धशीतौ वा रूक्षोष्णौ रूक्षशीतौ वाऽविरुद्धौ भवतः, प्रज्ञप्तौ तु स्निग्धरूक्षशीतोष्णा उक्ताः। 'अनन्तप्रदेश' अनन्तपुद्गलं गृह्णाति, अभव्येभ्योऽनन्तगुण, सिद्धेभ्योऽनन्तगुणहीनं कर्मस्कन्धमिति। स्कन्धा अपि प्रतिसमयमनन्ता गृह्णाति।

कर्मणो योग्यमयोग्य च द्रव्यं अस्ति तद् विभागदर्शनार्थं ग्रहणाऽग्रहणवर्गणाः प्ररूप्यन्ते। इह समस्तलोकाकाशप्रदेशेषु ये केवलैकाकिनः परमाणवः तत्समुदायः सजातीयत्वात् एकावर्गणा। इयं स्वभावाज्जीवानामग्रहे इत्यग्रहणवर्गणा। एवं द्वियादिस्कन्धसंख्यातासंख्यातानंतप्रदेशस्कन्धनिष्पन्ना अप्यग्रहे यावदनन्तानन्तैरेव परमाणुभिर्निष्पन्नानामेकोत्तरवृद्धिभाजां स्कन्धानां समुदायरूपा अनन्ता औदारिकाविवर्गणाः। स्थापना तासां। अनया दिशा ध्रुवादि लिख्येत-

४ ४ ४	७ ७ ७	१० १० १०	१३ १३ १३	१६ १६ १६	१९ १९ १९	२२ २२ २२	२५ २५ २५
३ ३ ३	६ ६ ६	९ ९ ९	१२ १२ १२	१५ १५ १५	१८ १८ १८	२१ २१ २१	२४ २४ २४
२ २ २	५ ५ ५	८ ८ ८	११ ११ ११	१४ १४ १४	१७ १७ १७	२० २० २०	२३ २३ २३
१ १ १	औदारिक-वर्गणा ज्ञेयाः	वैक्रिय-वर्गणा ज्ञेयाः	आहारक-वर्गणाः	अग्रहण-वर्गणा ज्ञेयाः	तैजसवर्गणा ज्ञेयाः	अग्रहण-वर्गणाः	भाषावर्गणा ज्ञेयाः

२८ २८ २८	३१ ३१ ३१	३४ ३४ ३४	३७ ३७ ३७	४० ४० ४०	४३ ४३ ४३	एवं ध्रुव १ अध्रुव २
२७ २७ २७	३० ३० ३०	३३ ३३ ३३	३६ ३६ ३६	३९ ३९ ३९	४२ ४२ ४२	△सचित ३ अचित ४
२६ २६ २६	२९ २९ २९	३२ ३२ ३२	३५ ३५ ३५	३८ ३८ ३८	४१ ४१ ४१	शून्य ५ प्रत्येक ६ अनंत ७-धूमिका ८ अबद्या ९
अग्रहण-वर्गणा ज्ञेयाः	आनप्राणवर्गणा एतदूर्ध्व ज्ञेयाः	अग्रहण-वर्गणा ज्ञेयाः	मनोवर्गणा	अग्रहण-वर्गणाः	कर्म-वर्गणाः	अनंता वर्गणाः परिकल्पनीयाः । △

वर्गणा अपि स्थाप्याः । अत्र सैद्धान्तिकाः कार्मग्रन्थिकाश्च केचिदौदारिक-वैक्रियाहारकवर्गणानामभ्यन्तरद्वयेऽग्रहणवर्गणा इच्छन्ति । युक्तं तद्यत औदारिकवर्गणाभ्यो वैक्रियवर्गणास्ताभ्योऽप्याहारकवर्गणाः प्रदेशतोऽसंख्येयगुणा इष्यन्ते । एतच्चान्तरालेऽग्रहणवर्गणा विना नोपपद्यते । परं कर्मप्रकृतौ नोक्ताः । भागावसरस्तत्र य उपशान्तो वेदनीयमेव बध्नाति स यत् किमपि द्रव्यं गृह्णाति तदेकस्य वेदनीयस्यैव भवति । अन्यस्य बन्धाभावात् । यस्तु सूक्ष्मः षड्विधं बध्नाति तेन गृहीतं षड्विभागैः परिणमति । एवं सप्तधा सप्तभिः, अष्टधा अष्टभिः परिणमति । ननु ते भागाः समा विषमा वेत्याह-

आउगभागो थोवो नामे गोए समो तओ अहिगो ।
आवरणमंतराये सरिसो अहिगो य मोहे वि ॥ ९५ ॥
सव्वुवरि वेअणीयं भागो अहिगो उ कारणं किं तु ।
सुहदुक्खकारणत्ता ठिईविसेसेण सेसाणं ॥ ९६ ॥

अष्टधा बन्धे यदनन्तस्कन्धात्मकं द्रव्यं गृह्णाति तन्मध्यात् सर्वस्तोको भाग आयुषः । तदपेक्षया नामगोत्रयोरधिकः । स्वापेक्षया समः । ज्ञानदर्शनावरणान्तरायाणां स्वापेक्षया समो नामगोत्रापेक्षया ऽधिकः । एतदपेक्षया मोहेऽधिकः । मोहे सर्वोपरि भागो जातस्ततोऽपि वेदनीये इति । किं कारणं ? सुख-दुःखकारणरूपं हि वेदनीयं तत्भागपरिणताश्च पुद्गलाः स्वाभावादेव प्रचुराः सन्तः स्वकार्यं कर्तुमलम् । शेष कर्मपुद्गला स्वल्पा अपि स्वकार्यं कुर्वन्ति । स्निग्धान्नं स्वल्पमपि तृप्तिं करोति, कदन्नं बहु इति । सुखदुःखरूपत्वात् वेदनीयस्य बहुभागाः स्थितिविशेषाच्छेषकर्मणामल्पत्वं बहुत्वमिति । साद्यादीनाऽऽह-

छण्हं पि अणुक्कोसो पएसबन्धो चउव्विहो बन्धो ।
सेसतिगे दुविगप्पो मोहाउ [य] सव्वहिं चेव ॥ ९७ ॥

षण्णां ज्ञान-दर्शनावरण-वेदनीय-नाम-गोत्रा-ऽन्तरायकर्मणामनुत्कृष्ट एव प्रदेशबन्धे चतुर्विधः साद्यादिर्बन्धो भवति । कथं सूक्ष्मस्योत्कृष्टयोगे स्थितस्यैकं द्वौ वा समयौ यावदुत्कृष्टः प्रदेशबन्धः प्राप्यते । सूक्ष्मो मोहायुषी न बध्नात्यतोऽनयोर्भागं द्रव्यमिह बहु मिलतीत्युत्कृष्टः । तत्र उपशान्तेऽबन्धको भूत्वा निपत्योत्कृष्टादनुत्कृष्टं बध्नतः सादिः । तमप्राप्तानामनादिः । ध्रुवाऽध्रुवौ प्राग्वत् । शेषत्रिके जघन्याऽजघन्योत्कृष्टरूपे साद्यध्रुवौ द्विधा । तत्र सूक्ष्मे उत्कृष्टः सादिः । पातेऽध्रुवः । जघन्यस्तु षण्णां [1]पर्याप्तमन्दवीर्यसप्तधाबन्धकसूक्ष्मनिगोदस्य भवाद्यसमये लभ्यते । द्वितीयेऽजघन्यः पुनः संख्यातेनाऽसंख्यातेन वा कालेन जघन्यः । ततोऽजघन्यः । एवमनयोः साद्यध्रुवता । मोहायुषोः सर्वत्रैव जघन्यादौ४ द्विधा तत्र मिथ्यादृग् सम्यग्दृग्वाऽनिवृत्त्यंतः सप्तबन्धको मोहस्योत्कृष्टप्रदेशबन्धं करोति । पुनरनुत्कृष्टं उत्कृष्टमेवमनयोः साद्यध्रुवता । जघन्याजघन्यौ सूक्ष्मनिगोदादिषु सरतामुक्तौ । उत्तराणामाह—

△ एतदन्त्यकोष्ठगतवर्गणाभेदा अस्माभिः सम्यग् नावगम्यन्ते । १ पर्याप्तं=अत्यन्तम् ।

तीसण्हमणुक्कोसो उत्तरपयडीण चउविहो बन्धो ।
सेसतिगे दुविगप्पो सेसाणं चउविगप्पो वि ॥ ९८ ॥

ज्ञानाव० ५, स्त्यानर्द्धित्रिकवर्जदर्शना० ६, अनंतवर्जकषाय १२, भयजुगुप्सा, अन्तराय ५, त्रिंशतोऽनुत्कृष्टः साद्यादिश्चतुर्धाऽपि । तत्र ज्ञानावरण ५ अन्तराय ५ दर्शनानां ४=१४ यथामूलप्रकृतिषट्कस्य भावितः तथैव भावनीयः । परं दर्शने निद्रापञ्चकभागाधिक्यं । निद्राद्विकस्य त्वविरतादि निवृत्त्यन्ताः सप्तधा बन्धकाले एकं द्वौ वा समयावुत्कृष्टप्रदेशबन्धकाः । आयुर्द्रव्यभागोधिकः सप्तधात्वात् स्त्यानर्द्धित्रिकभागोप्यधिकः मिथ्यादृग्-सासादनावेव तद्बध्नीतो न्यौ। नान्ये । मिश्रस्य उत्कृष्टयोगो नास्तीति सोऽपि न । उत्कृष्टान्निपत्याऽनुत्कृष्टं गतस्य सादिः । अनाद्यादि प्राग्वत् । अप्रत्याख्यानानां (४) अविरते उत्कृष्टो बन्धः । मिथ्यात्वानन्तानां ५ भागोऽधिकः । प्रत्याख्यानानां (४) देशविरते उत्कृष्टः । पूर्वाणां भागोऽधिकः । भयजुगुप्सयोरविरतादिनिवृत्त्यन्ता उत्कृष्टबन्धकाः मिथ्यात्वभागो लभ्यते । सञ्ज्वलनक्रोधस्याऽनिवृतिः पुंवेदे छिन्ने उत्कृष्टबन्धं करोति । मिथ्यात्वाद्यकषाय १२, नोकषायाणां ९ भागोऽधिकः । [माने] क्रोधभागोऽधिकः । (मायालोभयोः) [मायायां क्रोधमानभागोऽधिकः] लोभे सर्व मोहभागोऽतोऽधिकः । तत्रोत्कृष्टादनुत्कृष्टं गच्छतां सादिः। अनाद्यादिः प्राग्वत् । शेषत्रिके द्विधा-तत्राऽनुत्कृष्टप्रस्तावे उत्कृष्टः सादिरध्रुवश्चोक्तः । जघन्याऽजघन्यौ निगोदेषु सरतां भाव्यौ । त्रिंशतः शेषासु चतुर्धाऽपि, सादिरध्रुवश्च सम्बध्यते । तत्राऽध्रुवाणामध्रुवत्वादेव, ध्रुवाणां त्रिंशद्हृतैव शेषाः १७, तत्र स्त्यानर्द्धित्रिकमिथ्यात्वानन्तानुबन्धिनां ८ सप्तधा बन्धको मिथ्यादृगुत्कृष्टबन्धं करोति । निपत्यानुत्कृष्टं गतस्येत्याद्यनुवर्त्तमाना साद्यध्रुवत्वम् । जघन्याऽजघन्यौ निगोदेषु वाच्यौ । वर्णादिनवकस्याऽप्येवमेव वाच्यं । परं सप्तबन्धको मिथ्यादृष्टिर्नाम्नस्त्रयोविंशतिं बध्नन्नुत्कृष्टप्रदेशबन्धकः ।

स्वामित्वमाह--

आउक्कस्सपएसस्स पंच मोहस्स सत्तठाणाणि ।
सेसाणि तणुकसाओ बन्धइ उक्कोसगे जोगे ॥ ९९ ॥

आयुषः उत्कृष्टप्रदेशबन्धस्य मिथ्यादृगविरतदेशप्रमत्ताऽप्रमत्ताः पञ्च स्वामिनः । [योगस्य] अल्पत्वान्न सासादनः । मिश्रनिवृत्त्यादयस्त्वायुर्बन्धं न कुर्वन्त्येव । मोहस्योत्कृष्टबन्धस्वामित्वे सासादनमिश्रे त्यक्त्वाऽनिवृत्त्यन्तानि सप्तस्थानानि । शेषाणि षट्कर्माणि तनुकषायः सूक्ष्म उत्कृष्टयोगस्थ उत्कृष्टप्रदेशानि बध्नाति मोहायुषी न बध्नातीति तद्भागोऽधिकः । जघन्यमाह--

सुहुमनिगोयापज्जत्तगस्स पढमे जहण्णगे जोगे ।
सत्तण्हं पि जहण्णो आउगबंधे वि आउस्स ॥ १०० ॥

सूक्ष्मनिगोदस्याऽपर्याप्तस्य भवाद्यसमये जघन्ययोगस्थस्यायुर्वर्जसप्तकर्मणामेकं समयं जघन्यतः प्रदेशबन्धः । आयुषोऽपि जघन्यप्रदेशबन्धोऽस्यैवायुर्बन्धकाले भवति । उत्तराणामुत्कृष्टजघन्यबन्धस्वामिन आह--

सत्तरस सुहुमसरागा पंचगमणियट्टिसम्मगो नवगं ।
अजई बीयकसाये देसजई तइयए जयइ ॥ १०१ ॥

ज्ञानावरण ५, दर्शन० ४, सातयशःकीर्त्युच्चैर्गोत्राऽन्तराया-५-णां=१७ सूक्ष्म उत्कृष्टप्रदेशबन्धं करोति । मोहायुर्भागोऽत्र दर्शनावरणनामयोरनुक्तप्रकृतिभागाश्च । पुंवेदः संज्वलन ४. पंचकमनिवृत्ति-

त्कृष्टं बध्नाति । हास्यरतिभयजुगुप्साभागोऽत्र । सम्यग्दृग्गाविरताद्यपूर्वान्तः सम्यग्दृष्टिः निद्राद्विक-हास्यषट्क-तीर्थकरख्यं नवकं बध्नाति । मिथ्यात्वभागोऽत्र । 'अजति' रविरतौ 'द्वितीयकषायान्' ऽप्रत्याख्यानान् वेदयतिस्तृतीयान् प्रत्याख्यानान् 'यतते' उत्कृष्टाणू [न्] बध्नाति ।

तेरस बहुप्पएसं सम्मो मिच्छो व कुणइ पयडीओ ।
आहारमप्पमत्तो सेसपएसुक्कडं मिच्छो ॥ १०२ ॥

असात-नरायु-देवायु-देवद्विक-वैक्रियद्विक तुल्याद्यसंहनन-शुभखगति-सुभग-सुस्वरा-ऽऽदेयास्त्रयो-दश बहुप्रदेशाः सम्यग्दृग् मिथ्यादृग्वा करोति । आहारकद्विकमप्रमत्तो निवृत्तिश्चोत्कृष्टप्रदेशं बध्नाति । उक्तचतु पञ्चाशच्छेषाः षट्षष्टि.प्रदेशोत्कटबन्धा मिथ्यादृष्टिरेव करोति । कीदृगुत्कृष्टं जघन्यं च करोतीत्याह—

सन्नी उक्कडजोगी पज्जत्तो पयडिबन्धमप्पयरो ।
कुणइ पएसुक्कोसं जहन्नयं जाण विवरीए ॥ १०३ ॥

'संज्ञी' समनस्कः उत्कटयोगव्यापारः पर्याप्तिमान् प्रकृतिबन्धकेष्वल्पतरप्रकृतिबन्धकः । करोति (प्रकृष्टि) [प्रदेश] बन्धमुत्कृष्टं, उक्तगुणविपरीते जघन्यं विद्धि । जघन्यबन्धस्वामित्वमाह-

घोलणजोगिअसन्नी बंधइ चउ दुन्नि अप्पमत्तो उ ।
पंच असंजयसम्मो भवाइसुहमो भवे सेसा ॥ १०४ ॥

नारकदेवायुषी नरकद्विकमेनाश्नतस्रो घोलमानयोगोऽसंज्ञी बध्नाति जघन्यप्रदेशाः एकं चतुरो वा समया(:) [न्]। पृथिव्यादयश्चतुरिन्द्रियान्ता देवनरकयोर्नोत्पद्यन्ते तेन नैतच्चतुष्कं बध्नन्ति । असंज्ञ्य-पर्याप्तस्तु तथाविधसंक्लेशविशुद्धयभावान्न तद्बध्नातीत्यनुक्तोऽपि पर्याप्तो दृश्यः । द्वयमाहारकद्विकम-प्रमत्तो घोलमानयोगो नाम्न एकत्रिंशद्बन्धको जघन्य करोति । देवद्विकवैक्रियद्विकतीर्थकराः पञ्च भवाद्ये समयेऽविरत (न्) [देव०४नृ० ती० वे०] सम्यग्दृग्जघन्यप्रदेशाः करोति, पर्याप्त एकोनत्रिंशद्बन्धकः । उक्तकादशेभ्यः शेषाः १०९ भवादौ बह्वीर्बध्नन् सूक्ष्मापर्याप्तनिगोदजीवो जघन्यप्रदेशा बध्नाति ।

प्रकृतिस्थित्यादिहेतूनाह—

जोगा पयडिपएसं ठिइअणुभागं कसायओ कुणइ ।
कालभवे खित्तविक्खो उदओ सविवागअविवागो ॥ १०५ ॥

योगो वीर्यं तस्मात्प्रकृतिः कर्मणां स्वभावः, पुद्गलास्तिकायदेशाः प्रदेशाः, कर्मवर्गणाऽन्तः-पातिनः कर्मस्कन्धाः समाहारः। तद् जीवः करोति । प्रकृतिप्रदेशयोर्योगो हेतुरित्यर्थः । मिथ्यात्वाविरति-कषायाणामभावेऽप्युपशान्तादिषु केवलयोगेनैव वेदनीयं बध्यते । अयोगे तु न बध्यते इत्यन्वयव्य-तिरेकाभ्यां योग एव हेतुः प्रधानं । ननु योगः कियान् ? आह सूक्ष्मनिगोदस्याऽपि सर्वजघन्यवीर्योऽपि प्रदेशोऽसङ्ख्येयलोकाकाशप्रदेशप्रमाणान् वीर्यस्य भागान्प्रयच्छति । बहुवीर्ये तु बहुतराऽसंख्येयभागाः ज्ञेयाः । तच्च जघन्यवीर्याणां समुदाय एका वर्गणा, एकाधिके द्वितीया, एवं [द्वि]त्र्यादिभिः, १५-१५-१५, १४-१४-१४, १३-१३-१३, १२-१२-१२, ११-११-११, १०-१०-१०, एवं यदा एकोत्तरा वृद्धिर्नप्राप्यते किन्त्वसख्येयवीर्यैरेव तदा तैः समैरेका स्पर्द्धकवर्गणा एवं द्व्यादि-भिर्यावत् श्रेणेरसंख्यातभागवर्तिप्रदेशमानानि । तेषां समुदाय एकं योगस्थानकं । सूक्ष्मनिगोदस्य यज्जघन्य-

नन्ता जीवास्तथाप्यसंख्येयान्येव स्थानानि यत एकस्मिन्नेव स्थाने स्थावरा अनन्ता जीवा भवन्ति, त्रसास्त्वसंख्याताः। स्थानं स्थितिः कर्मणो जघन्यतोऽन्तर्मुहूर्त्तमुत्कृष्टतः सागरकोटाकोट्यादिका स्थितिः। अनुपश्चाद् बन्धाद् भवनं अनुभवो यस्याऽसौ अनुभागो रसः समाहारः तज्जीवः कषायात्करोति तदध्यवसायात्। कषाया ह्युदीरणाः सर्वजघन्याया अपि कर्मस्थितेर्निर्वर्तकान्यसंख्येयलोकाकाशप्रदेशमानान्यान्तमौहूर्तिकान्यध्यवसायस्थानानि जनयन्ति। रसः पूर्ववत्। मिथ्यात्वाऽविरत्यभावेऽपि कषायसद्भावे प्रमत्तादिषु स्थित्यनुभागौ भवतः। [तद]भावे तूपशान्तादिषु नेति त्वन्वयव्यतिरेकाभ्यां कषायजत्वम्। 'कालभवे' त्ति इह तावन्मूलप्रकृतयो ध्रुवोदयाः। ज्ञानाव० ५ दर्शन० ४ मिथ्यात्वतैजसकार्मणवर्णादि ४-अगुरुलघु-स्थिरास्थिर-शुभाशुभ-निर्माण-अन्तरायाः ५=२१ ध्रुवोदया एव सर्वजन्तूनामुदयच्छेदादर्वागेतदुदयो भवत्येव। शेषाणां तु कालभवक्षेत्राऽपेक्षः। तथाहि–निद्रावेदादीनां प्रायो रजन्यादिकाले उदयः, गत्यादीनां भवं प्राप्योदयः, आनुपूर्व्यादीनां क्षेत्रापेक्ष उदयः। (अथवैकोऽपि निद्रोदयः कालं ग्रीष्म, भवं पृथिव्यादिकं, क्षेत्रं सजलादिकं प्राप्योदयः। आनुपूर्व्यादीनां क्षेत्रापेक्ष उदय)। अथवैकोऽपि निद्रोदयः कालं ग्रीष्मं भवं पृथिव्यादिकं क्षेत्रं सजलादिकं प्राप्य वर्धते। द्रव्यभावाऽपेक्षे वा। द्रव्यं दधिभृङ्गाकादि प्राप्य निद्रां भावे चित्तस्वास्थ्यादि। उदयो द्विधा सविपाकोऽविपाकश्च। यत्र स्वस्वभावस्थित स्वस्वरूपेणैव कर्मोदेत्यसौ सविपाकः यथा नरस्य नरगतिपञ्चेन्द्रियजात्यादितद्भवयोग्यकर्मोदयः। यत्र तु स्तिबुकसंक्रान्तं परप्रकृतिभावेन कर्म वेद्यतेऽसोऽविपाकः। यथा नरस्य नरगतित्वेन वेद्यमानानां नरकतिर्यग्देवगतिनामुदयः। तस्मात्स्वरूपेण वा पररूपेण वा वेदितमेव कर्म क्षीयते। योगस्थानानि कारणं १, प्रकृति २ प्रदेशाः ३ कार्यं, स्थितिबन्धाध्यवसायस्थानानि कारणं ४, स्थितिविशेषाः कार्यं ५ अनुभागबन्धाध्यवसाय[स्थानानि] कारणं ६ अनुभागाः काय ७। एषां अल्पबहुत्वमाह—

सेढिअसंखेज्जइमे जोगट्ठाणाणि होन्ति सव्वाणि।
तेसि असंखेज्जगुणो पयडीणं संगहो सव्वो ॥१०६॥
तासिमसंखेज्जगुणा ठिईविसेसा हवन्ति नायव्वा।
ठिइबन्धज्झवसायट्ठाणाणि असंखगुणिआणि ॥१०७॥
तेसिमसंखेज्जगुणा अणुभागे होन्ति बन्धठाणाणि।
एत्तो अणंतगुणिआ कम्मपएसा मुणेयव्वा ॥१०८॥
अविभागपलिच्छेआ अणंतगुणिआ हवन्ति इत्तो उ।
सुयपवरदिट्ठिवाए विसिट्ठमयओ परिकहन्ति ॥१०९॥

एकाकाशश्रेणेरसंख्येयभागे यावन्तः प्रदेशास्तत्संख्यानि योगस्थानानि। तानि चोत्तरपदापेक्षया सर्वस्तोकानीति शेषः। तेभ्योऽसंख्येयगुणः प्रकृतीनां 'सङ्ग्रह' समुदयः सर्वोऽपि 'संखाईआओ खलु ओहीणाणस्स सव्वपयडीओ, इति वचनात्। एतदावरणस्याप्येतावन्तो भेदा एवं मत्यादीनामपि, आनुपूर्वीणां बन्धोदय वैचित्र्येणाऽपि[प्य]संख्याता भेदाः, ते च लोकस्य सङ्ख्येयभागवर्तिप्रदेशराशितुल्या इति चूर्णीकारोक्तविशेषः। 'भेदाः' प्रकृतय उच्यन्ते ताभ्यः स्थितिविशेषा अन्तर्मुहूर्त्तं एकद्विसमयाधिकादिरूपा असंख्यातगुणा भवन्ति। एकैकस्या प्रकृतेरसंख्यातैः स्थितिविशेषैर्बध्यमानत्वात्। स्थितिः कर्मणोऽवस्थानानि। स्थितिविशेषेभ्य [स्थितिबंधाध्यवसायस्थानान्यसंख्येयगुणाणि। एकैकस्थितिविशेष्योऽ]

(ताभ्य) संख्येयलोकाकाशप्रदेशप्रमाणैरध्यवसायस्थानैर्जन्यते, तेभ्यः स्थितिबन्धाध्यवसायस्थानेभ्योऽसंख्येयगुणान्यनुभागबन्धस्थानानि भवन्ति, यतः स्थितिबन्धाध्यवसायस्थानमेकैकमन्तर्मुहूर्तमानम्। अनुभागबन्धाध्यवसायस्थानं त्वेकैकं जघन्यतः सामयिकं उत्कृष्टतोऽष्टसामयिकमिति । एतेभ्यः अनन्तगुणाः कर्मप्रदेशाः स्कन्धाः गुणितव्याः । यत एते सिद्धानन्तभागेऽभव्येभ्योऽनन्तगुणाः प्रतिसमयं गृह्यन्ते । क्षीरनिम्बाद्यधिश्रयणैरिवानुभागबन्धाध्यवसायस्थानैस्तन्दुलेष्विव कर्मपुद्गलेषु रसो जन्यते । स चैकस्याऽपि परमाणोः केवलिना छिद्यमानः सर्वजीवानन्तगुणानविभागपलिच्छेदान्प्रयच्छति । यतोऽन्यो न। तेऽविभागपलिच्छेदा अनन्तगुणा भवन्त्येतेभ्यः, कर्मस्कन्धेभ्यः, यतः प्रतिपरमाणु सर्वजीवानंतगुणाः प्राप्यन्त इति । श्रुतं द्वादशाङ्गं तत्प्रवरो दृष्टिवादस्तत्र विशिष्टमतयः तीर्थंकरगणधराः परिकथयन्तीति विधानद्वारम् ।

सम्प्रति निःप्रत्यवायनिस्तीर्णप्रतिज्ञामरो ग्रन्थकारः प्राह:--

एसो बंधसमासो पिण्डुक्खेवेण वण्णिओ कोइ ।
कम्मप्पवायसुयसायरस्स निस्संदमित्तो उ ॥ ११० ॥

एष बन्धसंक्षेपः पिण्डितस्य कर्मप्रकृतिश्रुतादुत्क्षेपस्तेन न स्वेच्छया वर्णितः । कोऽप्यपूर्वः । कर्मप्रवादं प्रकृतिश्रुतं स एव महत्त्वात्सागरस्तस्य निस्यन्दमात्रः ।

बंधविहाणसमासो रइयो अप्पसुयमन्दमइणा य ।
तं बंधमोक्खनिउणा पूरेऊणं परिकहन्तु ॥ १११ ॥

बन्धभेदो संक्षेपो रचितोऽल्पश्रुतेन मन्दमतिना च मयेति गम्यते । तं ऊनातिरिक्तं बन्धमोक्षनिपुणा जिनवचनान्तःसारज्ञाः पूरयित्वा शिष्येभ्यः परिकथयन्तु । कर्तुश्रोतृफलमाह--

इअ कम्मपयडिपयरं संखेवुद्दिट्ठनिच्छयमहत्थं ।
जो उ पउंजइ बहुसो सो नाहीइ बंधमोक्खत्थं ॥ ११२ ॥

इति कर्मप्रकृतिश्रुताऽन्तर्गतं संक्षेपोद्दिष्टं कथितं निश्चितं प्रमाणेन महानर्थो यस्य तत् निश्चितमहार्थम् , दृष्टिवादाद्यन्तर्गतविचारबहुलत्वात् । एवं भूतं चामुं यो बहुशः उपयोक्ष्यते व्याख्यानाऽध्ययनगुणनश्रवणचिन्तनधारणादिद्वारेण पुनः पुनरुपयोगं नेष्यति स बन्धस्य मोक्षस्य च कर्माष्टकध्वंसरूपस्यार्थं ज्ञास्यतीति [अन्त्य]मङ्गलम् ।

[प्रशस्तिः]

सपादलक्षक्षोणीश-समक्षं जिनवादिनाम् ।
श्रीधर्मघोषसूरीणां, पट्टालङ्कारकारकाः ॥ १ ॥ [अनुष्टुब्]
त्रिवर्गपरिहारेण, गद्यगोदावरीसृजः ।
बभूवुर्भूरिसौभाग्याः, श्रीयशोभद्रसूरयः ॥ २ ॥ [,,]
स्वपरसमयज्ञानप्रीतप्रकृष्ट जगज्जना-
श्चतुरवचनामोदामूषामरेशगुरुप्रभाः ।
अभिनृपसभं गंगागौरप्रनर्तितकीर्त्तय-
स्तदनुमहसः पात्रं याता रविप्रभसूरयः ॥ ३ ॥ [हरिणी]

तच्छिष्यः [उदयप्रभसूरिः] स्वपरकृते श्री शतकस्य टिप्पनं [रचितवान्]॥छ॥ ग्रन्थाग्रं ॥१०००॥

शुद्धिपत्रकम्

पृष्ठम्	पंक्तिः	अशुद्धिः	शुद्धिः
२	१०	ध्मातं	ध्मातं
„	१६	सम्यग्दशन०	सम्यग्दर्शन०
३	१२	वृक्तं	वुक्तं
३	१५	रन्तवर्ति	रन्तर्वर्ति
५	२२	सग्रहात्मिका०	संग्रहात्मिका०
७	१८	भिघानमनुयोग०	भिधानमनुयोग०
८	९	सर्वसक्रमादि०	सर्वसंक्रमादि०
„	१८	कर्ममौक्षलक्षणः।	कर्ममोक्षलक्षणः।
१०	६	तद्रूपतयेव	तद्रूपतयैव
„	९	चतुविधम्	चतुर्विधम्
„	९	प्रकृतिदीधम्	प्रकृतिदीर्घम्
„	११	सर्वे त्रदीर्घं	सर्वत्र दीर्घं
„	„	सप्तविधब धाद्	सप्तविधबन्धाद्
१०	१४	ओप्य घ	ओप्य (घ)
१०	१५	निबधन	निबन्धन
१२	२६	सख्येयभाग०	संख्येयभाग०
„	२९	सपूर्ण०	संपूर्ण०
१३	१२	तेजोजागेण	तेजोजोगेण
१५	२२	ठिइअणुभाग	ठिइअणुभागं
१८	२१	सजमदंसण	संजमदंसण
„	२६	धटन्त	घटन्त
१९	२९	तेजालेस्या०	तेजोलेश्या०
२०	४	सीन्नपज्जता०	सन्निपज्जत्ता०
२१	९	तब्भगएसु	तब्भवगएसु
२२	४	इयदिठ्ठी	इयदिट्ठी
„	२४	मिथ्यात्व	मिथ्यात्वं
२४	१४	विसेससाहि०	विसेसाहि०
२४	२२	०भिहिय	भिहियं
२५	१६	पविठ्ठा	पविठ्ठा
२६	१३	सर्वजधन्य०	सर्वजघन्य०
„	१४	स्पर्धकउच्यते	स्पर्धकमुच्यते
„	२०	प्नतिपद्यते	प्रतिपद्यते
„	२७	सचयात्मिकां	संचयात्मिकां
„	३०	ावभागां	विभागां
२७	४	यदूनन्त०	यदनन्त०
२८	२४	एव	एवं
२९	१२	कि वा	किं वा
„	२४	एका ट्श्यां	एकादश्यां
„	२९	छद्मथं	छद्मस्थं
३०	११	पर	परं
३१	२५	एवस वंस्तोकवीय०	एव सर्वस्तोकवीर्यं०
„	„	सवजघन्यः,	सर्वजघन्यः,
„	३०	श्रेण्यसख्य-	श्रेण्यसंख्य-
३२	३	विभागापचय	विभागोपचय
३२	२२	तद ंख्यगुण०	तदसंख्यगुण०
३२	१२	पएसा ण	पएसाण
३२	३४	न सम्यग्...............इति।	स एवं प्रतिभाति-तद्यथा—योगस्थानकानि आउत्कृष्टयोगसंज्ञिपर्याप्तक संभवानि भवन्ति।
३३	१६	त्तगेसु, सव्व०	त्तगेसु सव्व०
३३	२४	बन्धनिरोघेन	बन्धनिरोधेन
३३	२५	न्निरोघस्य	न्निरोधस्य
„	२५	तन्निरोघश्च	तन्निरोधश्च
३४	५	लब्भति	लब्भंति
३६	२७	अभिनिविशो	अभिनिवेशो
३८	२४	वन्धो	बन्धो
४१	६	मुप्पान्यतो	मुप्पायन्तो
४७	१	संबेधः	संवेधः
४८	१३	तिकालविंयं	तिकालविसयं
४८	३१	पुनरयम्—लब्ध	पुनरयम्—
४९	४	बहलकर्म	बहुलकर्म
४९	२८	त्रिविध चैतदथ	त्रिविधं चैतदर्थं
५०	१७	अवधिज्ञा नव्या-पारो	अवधिज्ञानव्या-पारो
„	२५	'इद्रियमणो	'इंद्रियमणो
„	२६	स्वरूपनिर्देश।	स्वरूपनिर्देशः।
५१	९	दसणावरणीयं	दंसणावरणीयं
„	१७	सामन्नग्गहण	सामन्नग्गहणं
५१	२६	ममीदशेन	मीदृशेन
५२	२५	दुखोत्पादकं,	दुःखोत्पादकम्,
५३	१८	एतव्ववा०	एतेव्वेवा०

पृष्ठम्	पंक्तिः	अशुद्धिः	शुद्धिः
५४	१७	०द्रव्य	०द्रव्यं
५४	३०	कराम.माऽव्य०	करामानाव्य०
५४	३३	पतङ्ग–	पतङ्ग–
५५	१४	तेजोगुणापेत	तेजोगुणोपेत
”	२३	व्यापारेऽपि	व्य.पारेऽपि
”	३१	विशुद्ध द्रव्यै'	विशुद्धद्रव्यैः'
५६	२७	विध्नपर्यायेन	विघ्नपर्यायेण
		विध्न	विघ्न०
६४	११	तित्थरणाम	तित्थयरणामं
६८	१६	समयवृद्ध	समयवृद्ध्या
६८	१७	प्रतिप.दनमिति	प्रतिपादनीयेति
६९	१७	मयगइ०	मणुयगइ०
७०	९	पुव्वकोडि०	पुव्वकोडि०
७०	२६	सहसस्स०	सहस्स०
७१	३	खवगाइसु	खवगाइसु
७१	२२	गुणास्थानयोः	गुणस्थानयोः
७२	१४	खवगास्स	खवगस्स
७३	३	अठ्ठारम्मण्हं	अट्ठारसण्हं
७४	२७	तत्थए०	तित्थ०
”	१९	नब्वंधकेसु	नब्बंधकेसु
८३	२९	स.केलिट्ठो	संकिलिट्ठो
८५	३०	स्थितिरेवा	स्थितिरेव
८६	२९	दाणुव्वीओ	दाणुपुव्वीओ
८९	८	थिराथर	थिराथिर
९०	२१	किंचि	किंचि
९२	२३	॥१॥	॥७६॥
९३	२२	सव्वपडीणं	सव्वपयडीणं
९८	१२	अगुल०	अंगुल०
९९	१८	अणंतगुहीणं	अणंतगुणहीणं
९९	२९	यद्व्या०	तद्व्या०
१००	३	अट्ठविह	अट्ठविह
१०१	१२	कमंषु	कमंसु
१०२	४	लम्मति	लब्भति
१०३	१३	सयया	समया
१०३	१५-२५-२६ २९	पुर्ववत्	पूर्ववत्
”	१६	लब्भति	लब्भति
”	९३	बधकस्स	बंधकस्स
१०४	२०	मिच्छदिट्ठिम्मि	मिच्छदिट्ठिम्मि
१०५	२	लब्मति	लब्भति
१०६	१९	मिच्छदिट्ठी	मिच्छदिट्ठी
१०८	१९	बंद्धमाण०	बंधमाण०
१०९	२०	णिरूवणत्थ	णिरूवणत्थं
१०९	२५	बधठाणाणि	बंधठाणाणि
११०	२८	कश्चिदेकान्तिक,	कश्चिदेकान्तिकः,
१११	६	ठितिबधज्झ०	ठितिबंधज्झ०
११२	३	कम्मपोग्गला	कम्मपोग्गला
११२	२८	बधविहाण	बंधविहाण
११३	५	वुद्दिट्ठिं	वुद्दिट्ठं
११४	३	वाचकवर	वाचकवर
११५	१६	माह:–	माह–
११५	२३	प्रत्येक	प्रत्येकं
११६	१७	दसण	दंसण
११६	२७	चतुरसज्ञि०	चतुरसंज्ञि०
११७	३	अचक्षुःषि	अचक्षुषि
११७	११	सज्ञिनि	संज्ञिनि
११७	१४	बारगंसेमि	बारसेगंमि
११७	१५	उवआग	उवओग
११७	२१	चतुरसज्ञि०	चतुरसंज्ञि०
११७	२८	कण्ठय	कण्ठ्या
११८	८	त्रिकं जीव	[त्रीपुञ्जी]
११८	१७	अन्तमु०	अन्तमु०
११८	१९	दलिकर०	दलिकैर०
११८	२१	हृस्वा	ह्रस्वा
११८	२३	हृस्वां	ह्रस्वां
११८	३१	बादरा	बादराः
११८	३५	॥११॥ .... ॥१२॥	॥११॥ [एवं क्षीणाः कषाया यस्य स क्षीणकषायः] ॥१२॥
११८	३६	वितराग	वीतराग
११९	४	पूवकोटिं	पूर्वकोटिं
११९	५	यो.गः	योग[रहितः]
११९	७	मुणय	मणुय
११९	८	मवेदर्शित०	मेव दर्शित०
११९	३२	समुद्धाते	समुद्घाते

पृष्ठम्	पंक्तिः	अशुद्धिः	शुद्धिः
११६	३४	गुणेषूपया०	गुणेषूपयो०
११६	३७	पाठ:	पाठः
१२०	१०	लब्ध्यामा०	लब्ध्यमा०
१२०	२०	त्रयोदशः,	त्रयोदश,
१२०	३२	सुख	सुखं
१२१	३	निर्वाण	निर्वाणं
१२१	१३	सनप्पारभं०	सनप्पारंमज०
१२१	२१	औंदारिक २०	औदारिक २.
१२२	२१	माहा०	महा०
१२२	३५	० तृष्णा ह्म०	०तृष्णाब्रह्म०
१२३	६	प्राण्यगो	प्राण्यंगो
१२३	७	शेष	शेषं
१२३	८	सत्तरुई	सुत्तरुईं
१२३	१५	पुष्पाद्य	पुष्पाद्यः
१२३	२५	निवृत्य	निवृत्त्य
१२४	७	०मुहूर्तविशेष०	मुहूर्ताऽविशेष०
१२४	१७	सत्तावाव०	सत्ताऽऽव०
१२५	१	बधो	बन्धो
१२५	३२	ममस्मत्	मस्मत्०
,,	३२	लेशेत	लेशत
१२६	६	कामण	कार्मण
१२६	१८	मोहवजकम	मोहवर्जकर्म
१२६	२०	सूक्ष्माप०	सूक्ष्मोप०
१२६	२१	स्यादिति	स्यादिति [सादिः]
१२६	२४	ऽध्रुवाध्रुवो	ऽध्रुवध्रुवौ
१२६	३१	वण	वर्ण
१२६	३१	तजस०	तैजस०
१२७	२	गस्त्वा	गत्वा
१२७-१३२	३-६	भूत्त्वा	भूत्वा
१२८	४	युगयारन्यतरद्युग।	युगयोरन्यतरद्युगम्
१२८	६	अ यतर०	अन्यतर०
१२८	८	युग्मेव	युग्ममेव
१२८	११	आद्य,	आद्यः,
१२८	१३	सप्तादश०	सप्तदश०
१२८	२१	पर्याति०	पर्याप्ति०
१२८	२३	जातिर्वे०	जातिर्वै
१२८	३१-३४	यशकी०	यशःकी०
१२८	३१	विपक्षः	विपक्षाः
१२८	३५	रूप निवृत्य न०	रूपं निवृत्यनि०
१२९	३	आद्यं	आद्यः
१२९	६	एकस्त्रिंश०	एकत्रिंश०
१३०	२२	नृवेदः	नृवेदम्
१३०	३२	रित्या	रीत्या
१३१	३०	दुस्वर	दुःस्वर
१३१	३३	नाराचयोर्चतुर्दश	नाराचयोश्चतुर्दश
१३२	१४	० तोर्तसिपण्य	तोत्सर्पिण्य
१३२	२५	सायइ	साइय
१३२	३१	ऽध्रुवस्त्वात्	अध्रुवत्वात्
१३३	३३	ठिईसुक्कोमं	ठिइसुक्कोसं
१३४	३	ध्यवस्य०	ध्यवसाय०
१३४	६	०स्थान	०स्थानं
१३४	१३	तीर्थंकर	तीर्थंकरं
१३४	२४	बिन्दुवु०	बिन्दुचु०
१३४	३२	रस	रसं
१३५	११	पृथ्वि	पृथ्वी
१३५	२३	शुभत्त्वात्	शुभत्वात्
१३६	१४	तिर्यक्द्विकं,	तिर्यग्द्विकम् ,
१३६	२६	क्षपणयोग	क्षपणयोग्य
१३७	२०	रस	रसं
१३७	२५	प्रमतत्वो०	प्रमत्तत्वो०
१३७	२६	द्विकोद्याता	द्विकोद्योता
१३८	३	तदैवे	तदैवै
१३८	२४	पर	परं
१३९	२२	त्रिपत्ययाः	त्रिप्रत्ययाः
१४०	६	ता	ताः
१४०	२३	स्निग्धोष्णौः	स्निग्धोष्णौ
१४१	३	सचित २ अचित।	सचित्त २ अचित्त
१४१	२१	शेष कर्मपुद्गला	शेषकर्मपुद्गलाः
१४२	१८	वर्तमाना	वर्तमानात्
१४३	२	सम्यग्दगा	सम्यग्दृग